नं० ४६५१ – घ

गर्भाधानादि मंत्र भाष्यम्

पत्राणि ३८

नं० ४६५१-घ

गर्भाधानादिमंत्रभाष्यम्

नं० ४६५१-घ

पत्राणि ३८

नं० ४६५१-घ
गर्भाधानादि मंत्र भाष्यम्
पत्राणि ३८

०॥श्रीगणेशायनमः॥अथातोदर्शयेन्मुद्रासुमुखंसंपुटंतथा।तथोद्य॥घाहातानपल्लवास्कुअर
ष्वा।

पुरुषादिद्रश्य

॥ श्रीगणेशाय नमः ॥ अथ स्थालीपाकादिमन्त्रार्थः । तत्रादौ अग्निमूर्त्तिध्याने । चत्वारिशृङ्गेत्यस्याः गो
तमो वामदेवस्त्रिष्टुप् । यद्यपि सूक्तस्याग्न्यादिपञ्चदेवताकत्वात् पञ्चधायं मन्त्रो व्याख्येयः । तथापि नि
रुक्तकारस्य यज्ञात्मकाग्नेः प्रकाशकत्वेन तत्परतया व्याख्यायते । चत्वारि शृङ्गा श्चत्वारो वेदाः । शृङ्गस्था
नीयाय घेप्यापस्तम्बेन यज्ञं व्याख्यास्यामः ॥ शान्तिवेदे विधीयतेस्य फलं । अथर्वणस्येतरानपेक्षये
वैकाग्निसाध्यानां कृत्स्नकर्मणामभिधायकत्वात् तदपेक्षया । चत्वारि शृङ्गेत्युक्तं । त्रयो अस्य पादाः स
वनानि त्रीण्यस्य प्रवृत्तिसाधनत्वात् ॥ पादा इत्युच्यन्ते । द्वे शीर्षे ब्रह्मौदनं ॥ प्रवर्ग्यश्च द्वे शीर्षे सोमश्चाधा
न्यान्नेदमुक्तं । सप्त हस्तासः सप्त छन्दांसि । हस्तोनुष्ठानस्य मुख्यसाधनं । छन्दांस्यपि देवताः । त्रीणि तस्य
मुख्यसाधनमिति मुख्यव्यवहारः । त्रिधा बद्धः मन्त्रकल्पब्राह्मणैस्त्रिप्रकारबद्धः । बन्धनमस्य निष्पा ॥१॥
दकत्वं । वृषभः फलानां वर्षिता । रोरवीति भृशं शब्दायते ॥ ऋग्यजुःसामोक्तैः शस्त्रयागस्तोत्रि
रूपैः होत्रादुत्पादितैर्ह्वानिभिः सो रौति । एहा महो देवः । एष यज्ञात्मा महानुभावो देवः मर्त्यांना
विवेश मर्त्यैर्यजमानैर्निष्पाद्यत्वात् प्रविश्य उपचर्यते । अत्र पार्थक्येन चत्वारि शृङ्गेति वेदा वा एत उक्ता
इत्यादिनाभिरवोक्तः । तदत्रानुसन्धेयं । अग्न्यार्चनोपस्थानयोः विश्वानि नो दुर्गहेति सूक्तं । आ

मि.

मस्तुं वस्तुश्च नो जातवेदोऽग्निस्त्रिष्टुप् । हे जातवेदाः नोऽस्माकं दुर्ग्रहाद् दुःखेन गाह्यानि दुःखेन भोग्यानि वि
श्वानि रादुरिन्यतान्यति परुष्यति पारय सिंधुं न नावा ॥ सिंधुरिको यथा तद्वत् । अग्ने अहं त्रिवत् अयं था
तथा नो अस्माकं नमसा स्तोत्रेण गृणानः स्तूयमानः सन् नो अस्माकं तनूनामविता रक्षकः । बोधि बुध्यस्वा
यः स्व । यस्त्वा हृदा कीरिणा ति । तयो मर्त्यो मिरणधर्मा । अहं मपिता हृदा त्वां कीरणा स्तुत्यादिषु विक्षिप्तेन हृ
दा हृदयेन युक्तो मन्यमानः स्तुवन् । जोहवीमि अभ्यर्थं माह्वयामि । यद्वा सोऽत्त्वा वाचकेन कीरणा स्तु स्तौति
रूपलक्ष्यते । स्तौति युक्तेन मनसा त्वां मन्यमानो जोहवीमि । हे जातवेदः यशो धनं प्रजां चास्मासु धेहि । प्रजा
भिरहं त्वाभिः । हे अग्ने अमृतत्वं सततत्वविच्छेदलक्षणं अस्यां प्राप्नुयं ॥ प्रजामनु प्रजायते ॥ तदुतेमर्त्यामृतमि
ति श्रुतिः । उपस्थाने यस्मै त्वमिति । हे जातवेदः अग्ने त्वं यस्मै सुकृते सुकर्मणो यजमानाय । उ इति पूरणः । लो
कं स्योनं सु खकरं कृणवः अकरोः । यद्वा लोकमालोके न स्योनं कृणवः । अनुग्रहणार्थीत्यर्थः । स यजमा
नोऽश्विनं बहुस्यापेतं पुत्रिणं बहुपुत्रोपेतं । वीरवंतं वीरैर्वीर्येण वोपेतं । गोमंतं गोभिरुपेतं युक्तो रयिं
धनेन नशाते प्राप्नोति ॥ स्वस्ति विनश्वरं ॥ व्रीहिं निर्वपे ॥ हे व्रीहे अग्नये अग्न्यर्थं जुष्टं अभिप्रेरितं त्वां
निर्वपामि । शूर्पे निदधामि । अग्नीषोमाभ्यामित्यत्राग्नीषोमार्थमिति विशेषः । दर्शेष्टिं द्वाग्नीभ्यां

इतिविशेषः।यत्रनिर्वपस्तत्रप्रोक्षणं।आज्योसवने।सवितुष्ट्वाप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेण।वसोःसू
र्यस्यरश्मिभिरिति।हेआज्यदेवस्यसवितुःप्रसवेअनुज्ञायांसत्यांत्वांउत्पुनामिऊर्ध्वंशोधयामि।केनअ
च्छिद्रेणपवित्रेण।छिन्नंछिद्रंअविच्छिन्नेनवर्त्तमानंतेनपवित्रेणजगतोपावनेनआदित्यात्मना।पुनःसं
ज्ञायामितिपुनातेतित्रप्रत्ययः।अत्रब्राह्मणं॥असौवाआदित्योच्छिद्रंपवित्रमिववसोः।आतांवासहेताःव
सोःकरणेउत्प्रत्ययःसवनिन्।सूर्यस्यसूर्यमंडलात्मनः।रश्मिभिर्जगतांशुद्धिहेतुभिःउत्पुनामीत्यन्व
यः।इध्माधाने।अयंतइध्मआत्माजातवेदस्तेनेध्यस्ववर्द्धस्वचेद्धवर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्च
सेनान्नाद्येनसमेधयेति।हेजातवेदःजातप्रज्ञजातधनवाअग्नेअयंइध्मःतेतवइध्मशब्दःपुल्लिंगः
छांदसःआत्मास्वरूपंस्वरूपाविर्भावकारणत्वात्।अतस्तेनेध्मेनइध्मस्वएधितोभव।वर्धस्व। ॥१२॥
समृद्धोभवचअतःहेइध्मसमिद्धअग्नेअस्मान्यजमानान्अवर्धयच।तस्यैवतस्यैवविवरणं।प्र
जयासंतत्यापशुभिःगवादिभिःब्रह्मवर्चसेनवेदाध्ययनसंपत्त्याअन्नाद्येनअन्नंतदाद्यंचतेन
समेधयअस्मानितिशेषः।स्विष्टकृद्धोमे।यदस्यकर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं॥अग्नि
ष्टत्स्विष्टकृद्विद्वान्सर्वांस्विष्टंसुहुतंकरोतुमे।अग्नयेस्विष्टकृतेसुहुतहुतेसर्वप्रायश्चित्ता

हुतीनां। कामानां समर्धयित्रे सर्वान्नः कामान्समर्धय स्वाहेति। अस्य कर्मणः अत्र स्वरूपं अत्यरीरिचं वि
हिताइति रिक्तं अकरवं। यद्वा। हवि अस्मिन्कर्मणि न्यूनं मकर। माकरवं। तत्सर्वं विद्वान्स्विष्टकृत्। सुष्टु
इष्टं करोतीति स्विष्टकृत्। एवं विशेषोऽग्निः मे स्विष्टं तत्सुहुतं स्यादुतं करोतु। स्विष्टकृते स्विष्टकृद्गुणवु
त्काय। सुहुतहुते सुहुतं हविः जुहोति देवेभ्यो ददातीति सुहुतहुत् तस्मै। सर्वप्रायश्चित्ताहुतीनां सम
र्धयित्रे समृद्धिं कुर्वते। तथा कामानां समर्धयित्रे अग्नये इदं स्विष्टकृदाख्यं हविः। जुहोमि। हे अग्ने
नः सर्वान्नः कामान्समर्धय स्वाहा। हुतमस्तु॥ ८॥ नित्यप्रायश्चित्ताज्यहोमे॥ अयाश्चेत्यस्य गोतमो
वामदेवोऽग्निः पंक्तिः। अयाश्चाग्नेऽस्यनभिशस्तीश्च सत्यमित्त्वमयाअसि। अयासा वयसा कृतोऽया
सन्हव्यमूहिषे। अयानो धेहि भेषजं स्वाहा। हे अग्ने त्वं अयाः। अगम्योऽसि। शत्रुभि अनभि
शस्ती श्च अभिशंसनं पापकीर्तनं तेनापि वियुक्तोऽसि अनभिशस्तीकां दसो दीर्घः। सत्यमित्।
यत्वं अयाअसि अनभिगम्योऽसि परैरिति। याज्ञापतो इत्यस्मात्कर्मणि। असुनिनाभ्रु। समा
सेकृते अयाइति भवति। किं वा अयासा अप्राप्येण। आयेन वयसा अन्नेन हविर्लक्षणेन आयुषा
वाकृतोऽसि जरामरणरहित इति शेषः। किं वा अयासन् अयेत्ययं इदमः प्रथमैकवचनस्य अडादे

शः टिलोपश्च ॥ अयासन् अयमेव सन् त्वं यथावात्स्यं जानाति । यत्तोपस्यामः । अयमेव सन् हव्यं प्रत
दाऽस्ये दीयमानं [illegible] हविवर्द्दर्शं इत्सोऽसिद्धूः । अतस्त्व । अयमेव नः [illegible]नो अस्माकं धेहि । भेषजं । जतिरेकदो
षशमनं । स्वाहा तुभ्यमिदं हविर्दीयते इति शेषः । अतो देवा इत्यनयोः । अतो देवा अवन्तु नो यतो विष्णु
र्विचक्रमे । पृथिव्याः सप्त धामभिः । अस्मान् पृथिवीप्रदेशान् देवा अवन्तु । विष्णोः पृथिव्यादिलोकेषु
छंदोभिः ~~इमान्लोकान्~~ साधनैः जयं तैत्तिरीआमनंति विष्णुमुखा वै देवाः छंदोभिः इमान् लोका
न् अभ्यजयन् इति । अतः पृथिविप्रदेशात् देवानां रक्षणं नाम भूर्लोके वर्त्तमानानां पापनिवा
रणं । अत एव छब्रूात् पंचम्यास्तसिलू । इतितसिलु विष्णुविषेः किं चेतिनु प्रत्ययः ॥ ६ ॥ इदं विष्णुर्वि
चक्रमे त्रेधा निदधे पदं । समूढमस्य पांसुरे ॥ विष्णुस्त्रिविक्रमावतारधारी । इदं जनीयमानं स ॥२॥
र्वं जगदुद्दिश्य त्रेधा त्रिभिः प्रकारैः पदं निदधे स्वकीयपादं प्रक्षिप्तवान् । अस्य विष्णोः पांसुरे धूलि
युक्ते पादस्थाने समूढं इदं सर्वं जगत् सम्यगंतर्भूतं ॥ व्याहृतयो होमे विनियोगाश्चतुर्थ्यर्थे इष्टव्याः ॥
व्यस्तानां समस्तानां परब्रह्मर्षिर् व्यस्तानाम् अग्निः वायुः सूर्यो देवताः समस्तानाम् प्रजापतिर्देवता
देवी गायत्री छंदः । भूः । भुवं त्य स्यां भूतानीति श्रुतेः । अधिकरणे डिप्र ॥ भुवं भुवति विश्वगुणाम

वकाशप्रदानेनस्विप्रदानेनेतिवासुवः॥अंतर्भावितण्यर्थादस्तेर्निगुणाभावः।छंदसः।दुवटादेशः।
स्वः सुष्ठु अरणीयं स्वः सुखमस्मिन्स्वाप्यतेतिवा।सुशब्दोयस्पष्टाद्वत्तेः।अकर्तर्यपिपिव्यत्ययेनिविवृ
यण्आदेशः॥७॥इतिस्थालीपाकः॥छ॥अथगर्भाधान॥जयंतोक्तप्रकारेणोच्यते॥गर्भोधीयतेये
नकर्मणातद्गर्भाधानं।पत्न्यारजोदर्शनमारभ्याचतुर्थदिवसादूर्ध्वंमघामूलादिवर्जितसुखदे
शुभेदिनेगृहमलंकृत्यस्वस्तिवाचनगृहयज्ञपूर्वकंकर्मागनांदीश्राद्धंकृत्वागंधमाल्यादिभिःस्वय
मलंकृत्यकर्तुःस्नानोपलिप्तभूशयनमारोप्याचयोर्दंपत्योःसुपुत्रजननार्थंगार्भिकवैजिकदोष
परिहारार्थंइतिसंकल्प्य।अत्रमनुः॥गर्भैर्होमैर्जातिकर्मचूडामौंजीनिबंधनैः॥वैजिकंगार्भिकं
चैनोद्विजानामपमृज्यतइति॥तदर्थंगर्भाधानंकरिष्ये॥अश्वगंधायमूलंशुद्धवरेनिक्षिप्यास्या
दक्षिणनासाबीलेउदीर्ष्वातइत्यृचंजप्त्वानिषिंचेत्।ओपगमनेगर्भोत्पत्तिरक्षणंभवति॥उदीर्ष्वातःप
तिवतीह्येषाविश्वावसुंनमसागीर्भिरीळे॥अन्यामिच्छपितृषदंव्यक्तांसतेभागोजनुषा
तस्यविद्धि॥अस्यार्थः॥उदीर्ष्वातः।हेविश्वावसोअतस्थानात्कन्यासमीपान्उदीर्ष्वतिष्ठ॥

पतिवतीएषाकन्यापतिवतीहिसंज्ञिता।इदानींममपत्यः भोगयोग्याजाता॥अतःउदीषतिवा।अतः
शाबृशायोऽन्यः।विश्वावसुएतन्नामानंगंधर्वंचानमस्कारेणगीर्भिःईडे॥स्तोमि।नर्हिरतोविहायकां
श्चित्करोमीति।यदिब्रूषेतर्हिअन्या।पितृषदं।पितृकुलेस्थितांव्यक्तांअरुढेनिप।स्फुटांविगतांजनी
५ वास्तेनोद्व मा[illegible]दिराहिस्येनाशोढामित्यर्थः॥सतादृशापदार्थस्तवजन्मनुषाजन्मनैवभागःकल्पि
तः।अतस्तस्यतेभागंविद्धि।जानीहि।उभस्वेत्यर्थः॥छ॥इतिगर्भाधानं॥छ॥अथपुंसवनं॥छ॥
पुमानेवलाबुः सूयतेतत्पुंसवनं।पुमांस्तु सन्नयेननावलुप्यतेतदनवलोभनं॥प्रका[illegible]स्याप्र
कारः।छांदसः।एतत्कर्मद्वयंतत्रैवानुष्ठेयं।तृतीयगर्भमासेतत्रापिज्ञातेगर्भे।चतुर्थेवापुंस ॥४॥
वनमनवलोभनंवाकार्यं॥पूर्वेद्युः स्वस्तिवाचनपूर्वकंकर्मांगनांदीश्राद्धंएवंविधागर्भि
एषाएभोजनंकारयित्वाऽपरेदिनेतिथ्यृक्षेस्थंडिलेऔपासनाग्निमाधायहुत्वासंस्कारक
स्कःपविशेत्।सर्वेवोचरतस्तदा।संस्कार्यपुरुषोवापिस्त्रीवादक्षिणतःसदेतिउक्तत्वात्।पत्नी
मात्मनोदक्षिणतःउपविश्यप्राणानायम्यसंकल्पान्वाधानंकुर्यात्।ॐ अद्य।ममभार्यायाबी
जसंस्कारार्थंपुंसवनानवलोभनाख्यंकर्मकरिष्ये।तदंगमन्वाधानंकरिष्ये।तत्रदेवताप

रियुहार्थं अस्मिन्नन्वाहिते ग्नोपावमाने जातवेदसमग्निं इध्मेन प्रजापतिं प्रजापतिं माघारावाज्येन अ
ग्नीषोमौ चक्षुषी आज्येन प्रजापतिं च रुद्र येण शेषेण स्विष्टकृतमित्यादि सद्योयक्ष्ये स्थालीपाकं दाघा
रां तं प्रजापतये त्वाजुष्टं निर्वपामि ति निर्वप्य गोदध्यानीय पत्न्याः प्रस्रतो क्षिप्वात त्रांडरूपं माषद्वयं तन्म
ध्ये शिश्नरूपं यवं च निधाय प्रक्षिपेत् बसीत्रिः एष्ठत्। साप्तं सवनमिति त्रिरुक्तो आम्नाति। एवं त्रिः प्रषी
त्वा॥ ॥ अथानवलोभनाख्यं कर्म॥ परिमंडले गेहस्य छायायां तामुपवेश्य तस्या दक्षिणना
साबीले॥ आते गर्भो योनिमेतु पुमां बाण इवेषुधिं॥ आवीरो जायतां पुत्रस्ते दशमास्यः। आते गर्भ इति
द्वाभ्यां मंत्राभ्यां दूर्वारसमासिच्य प्रजापतिं मनसा ध्यायन् च रुद्र त्वायत्ते सुषीमे इति मंत्रेण पत्न्या
हृदयं स्पृष्ट्वा स्विष्टकृदादिहोमशेषं समापयेत्॥ इदं कर्म बीजसंस्कारत्वात् प्रतिगर्भमावर्त्तते।
अथ मंत्रार्थः॥ आते मंत्रः। प्रजापतिर्नाम्ना ऋषीणां दृष्टः अतः प्राजापत्य उच्यते। अयं मंत्रः पत्न्या दक्षिणनासा
बीले दूर्वारससेके विहितः। उत्तरमंत्रश्च अस्यार्थः। हे पत्नी पुमान् पुंरूपे गर्भः शुक्रशोणितसंघातरूपः ते यो
निमेतु। योनिर्गर्भाशयः गर्भधारणकारणत्वाद्योनिरित्युच्यते। आएतु आगम्य ता
त्प्रज्ञातु। तस्मिन् प्रबुद्धं भवत्वित्यर्थः। तत्र दृष्टांतः। बाणः शरः इषुधीमिव निषंगमिव तत्र प्रविश्य यथा।

आद्याकुलं तिष्ठति। तद्वत्। किंच। तेन वद्धामास्य॰ दशमासस्संभृतः मासाद्युपष्टी स्मादि
नायम्राक्षयः॰। दशमासी मातृद्वलेर्थः॰। माने नमध्येपातामावस्तूचितः॰। विर॰॥ कुर
5 वीरशाट्ठ एव पुत्रमावष्टयथावीरं मेदत्तेत्याद्विषु अन्नकु पुत्रशाट्ठस्याविद्यमानत्वा
वीरशाट्ठेनशत्कनुच्यते। तादृशः पुत्रः आस्मिन्कारदृश्येमास्यागते सति आज्ञाय
तांसमयसुप्रद्यातां॥ अग्निरैतु प्रथमो देवतानां सोस्यै प्रजां मुंचतु मृत्युपाशात्। तद
यं राजा वरुणोनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात्। अग्निरैतु। अस्यागर्भिण्यार
नाद क्षार्थमागच्छतु। कीदृशः। देवानां प्रथमो मुख्यः। आगतश्चसः अस्यै अस्यावध्वार्थेव
तुष्यः। प्रजांनु स्वनूप्यमानां मृत्युपाशान्मुंचतु। मोचयात्वित्यर्थः॰। अत्रत्का भिनाक्रिय
माणीमो वनं अयं वरुणो राजानुमन्यते। अंगीकरोतु। यथा मोचनेमानिइयं स्त्री पौत्रं
पुत्रोत्पत्तिनिमित्तमघं दुःखमनं न रुद्रिष्यतरोदनाः। नरुयाशा। तादाशित्युत्र लोडागमः॰॥ यत्ते। इमं
स्तुलीमहमस्ये हितमंतः॰ प्रजापत्तो॥ मनथेहमांतद्विद्धां संमाहपौत्रमघं नियातिं॥ ॥५॥

यत्ते सुसीमे। इत्युक्ती। सुसीमे सुष्टुमर्यादायुक्ते पतिसुश्रुषादि पातिव्रत्यविहीत धर्मयुक्ते इत्यर्थः। प्रजापतो सर्वो सा चित्तनिमित्तकारि विधातारि देवे प्रस्केसति॥ ते हृदये तक्षणाया समीपवर्त्तिनी गर्भात्राय अंतर्मध्ये यत्र हितं स्व भ्रोत्मकं बीजं तत्र विद्वां सं ज्ञातारं मामेव मम आत्मा वै पुत्रनामासीति श्रुतेः। अतः अनयक्रीयया तद्रक्षां करोमीति शेषः॥ तस्मादहं पौत्रं पुत्रसंबंधिअघं दुःखं मा निया मा प्राप्नुयां॥ ॥ इति पूसवनं॥ ॥ अथ सीमंतप्रयोगः॥ ॥ सीमंत उन्नीयते यस्मिन् कर्मणि तत्सीमंतोन्नयनं॥ ॥ चतुर्थेषष्ठेऽष्टमेवा गर्भे मासे शुक्लपक्षे पुन्नाम नक्षत्रयुक्ते शुभतिथौ प्राप्तायां पूर्वेद्युः कृक्षस्य मध्यम पादहृदय स्वस्तिवाचन पूर्वकं गर्भो गमाभ्युदयिकं श्राद्धं पूर्वोक्तप्रकारेण कृत्वा परेद्युः कृक्षस्य मध्यमपादहृदये उपलेपनाद्युपासन होमांतं कृत्वा अग्नेः पश्चादात्मनो दक्षिणतः अनडुहं चर्मप्राग्रीवमुत्तरलोमास्त्रीयोपवादेव्या त्॥ उद्द्यं॥ प्राणानायम्य संकल्प्य भार्या गर्भधारणसंस्कारार्थं सीमंतोन्नयनाख्यं कर्मकर्तुं तत्रदं गमन्वाधानं। धातारं। राकां। नेजमेषनामानं। स्कंदयं अहं विष्णुं प्रजापतिं। एताः प्रधानदेवताः आज्येन। शेषेण स्विष्टकृतमित्यादि॥ धाता ददातु दाशुष इति द्वाभ्यां। धात्रे। राकामहमिति द्वाभ्यां धात्रे राकाये। नेजमेष इति द्वाभ्यां इति नेजमेषाय। विष्णोश्रेष्ठेन स्यनया विष्ण वे। प्रजापते न त्वदे इति प्रजापतये। इष्टावाज्याहुती हुत्वा तर

गर्भ[illegible]न्यवद्दौदुंबरस्तबको । त्रिः शुक्लाशलल्या त्रीणि कुशपिंजूल्यानि वेकीकृत्य तेस्याः सीमंतमामूर्धांतं भू
र्भुवस्वरोमिति मंत्रमावर्तयति । [illegible] अस्यतु वीणायू ह्यः सोमं राजानं संगायतामिति वीणागाथिनो वीणावगा
6 थावान योस्त इति वीणागाथिनो संप्रेषयेत् ॥ तां सोम मन्म इति गाथाया असौ शब्द स्थाने समीपस्था
नदीनाम संबुद्ध्य गायेतां । ततः स्विष्टकृतादि होमशेषं समाप्य दक्षिणार्थमृषभं ब्राह्मणाय दद्यात् ॥
सवधः प्रजा वृद्धा ब्राह्मणीतदाद्य पदिष्टो रूपत्नीनत्तां कुर्यात् ॥ छ ॥ इदं कर्म प्रतिगर्भ नावर्त्तते ॥ अत्र
स्य मंत्रार्थः ॥ धाता ददातु दाशुषे प्राचीं जीवातुमक्षितां । वयं देवस्य धीमहि सुमतिं वाजिनीवतः ॥ धाता दे
व दाशुषे । हविर्दत्तवते यजमानाय । प्राचीं प्राकालीनां अक्षितां अदुष्टां जीवातुं जीवनौषधिं ददातु ॥
वयं वाजिनीवतः वाजमन्नं तद्वती क्रियावाजिनीवतद्वतो देवस्य धातुः सुमतिं अनुग्रहबुद्धिं धीमहि ॥ ध्या
यामहि ॥ धाता प्रजानामुत राय ईशे धातेदं विश्वं भुवनं जजान ॥ धाता कृष्टिरनिमिषाभिचष्टे धात्र इद्ध ॥६॥
व्यं घृतवज्जुहोतेति । प्रजानामीशे इह उत्तर । अपि च रायो धनस्य ईशे धाता इदं विश्वमशेषं
भुवनं त्रैलोक्यं भावितपर्यर्थे जनयामास । धाता कृष्टीः प्रजा अनिमिषान् अभिचष्टे पश्य
ति इति तवार्थे अतो धात्रे घृतवद्धव्यं जुहोत ॥ छ ॥ राकामहं सुहवं सुष्टुती हुवे शृणोतु नः सु

गगा। बध्नतुत्मनों। सीव्यत्वपः सुच्याछिद्यमानया ददातु वीरं शतदायमुक्थ्यं। संपूर्णचंद्रापौर्ण
मासी राका। तां देवीं सुहवां सा कान प्रबोधनेन कारिणीं सुष्टुती शोभनया स्तुत्याऽहं
हुवे। आह्वयामि। सुष्टुती शब्दतृतीयैकवचनस्य। सुपां सुलुगिति पूर्वसवर्णदीर्घ ईकारः।।
सा च सुभगा शोभनधना नो अस्मान् आह्वाने श्रवणेन तु शृणोतु। त्मना आत्मना। आत्मनैव स्वयमेव
बोधतु। अस्मदभिप्रायं बुध्यतां। बध्नातु। अपः कर्म पुत्रोत्पादनलक्षणं तत्। सूचि
स्थानीयया अछिद्यमानया। अविच्छिन्नया। अनुग्रहबुध्या सीव्यतु। संतनोतु। यथा वस्त्रादि
कं सूच्या स्यूतं चिरं तिष्ठति। स्थिरं करोतु। ददातु च। वीरं विक्रांतं शतदायं बहुधनं व
कुमप्रशंसनीयं पुत्रं ददातु। [illegible] राका हविः। हे राके। यास्ते ये सुमतयः सुपेश
सो याभिर्ददासि दाशुषे वसूनि। ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे
रराणा। हे राके देवी सुपेशसः शोभनरूपास्ते तव याः सुमतयः शोभनबुधयः।। याभि
र्मतिभिः दाशुषे हविर्दत्तवते। यजमानाय वसूनि धनानि ददासि प्रयच्छसि। अद्य तामि
ताभिर्मतिभिः सहिता त्वं सुमना शोभनमनस्का [illegible] उपागहि उपागच्छ। गमेः छंदसः

शपो लुक् अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः। असिद्धवदत्राभात् इत्यस्यासिद्धत्वात् हेर्लुगभावः।
किं कुर्वती हे भगे शोभनधने सहस्रपोषं सहस्रसंख्याकस्य धनस्य पुष्टिं। रराणा ददाना ती॥ रा दाने व्य
त्ययेन शानच्। छान्दसः। शपः श्लुः अभ्यस्तानामादिः इत्याद्युदात्तं। नेजमेष परापत सुपुत्रः पुन
रापत। अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान्॥ नेजमेष इति। स्कन्दग्रहेष्वन्यतमे नेजमेष इति हास
पुराणयोः प्रसिद्धः॥ तथा वैद्यके कुमारपिंडायां नेजमेषं प्रपूजयेत् इति पठ्यते। हे नेजमेष
परापत पराङ्मुखो गच्छ। विहि गर्भस्य द्वेषकः। यद्यवश्यमागंतव्यः। सपुत्रः पुत्रोपेतः
सन् पुनराग सुपुत्र गृहीत्वा पुनरागच्छ॥ आगत्य च। अस्यै मे मम स्वरूपभूतायामस्यां
पुत्रकामायां। सप्तम्यर्थे चतुर्थी। गर्भमाधेहि आधत्स्व पुमान् यो गर्भः पुमान् 7॥
भविष्यति॥ यथेयं पृथिवी मह्युत्ताना गर्भमादधे। एवं त्वं गर्भमाधेहि दशमे मासि सू
तवे॥ इयं पृथिवी मही उत्ताना सति गर्भमाधेहि त्ते। घृ लोके न निषिक्तं वृष्टिलक्षणं रे
तो गृहीत्वा सस्यलक्षणं गर्भं यथा धारयति एवं त्वं गर्भमाधेहि। आधत्स्व। दश

मे मासि सूष्यो सधियागर्भो जायते सुखेनोत्पन्नो भवति ॥ विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्यां ।
पुमांसं पुत्रं नाधेहि दशमे मासि सूतवे ॥ हे विष्णो अस्यां नार्यां कीदृश्यां गविन्यां कमनीयायां
कमपि तु योग्यायां ऋतुस्नातायामित्यर्थः । अन्ये तु गवीनीति स्त्रीणां धिया - रायस्याभिपानं मन्य
ते । वितेहि नाम्नित गरीवियोनिव गवीन्याभितिनि दर्शनात् । अस्यां नार्यां गविनीतस्यां दशमे मा
स्यागते सति सूतवे प्रसोतुं श्रेष्ठेन रूपेण युक्तं पुमांसं पुत्रान् बहुवचनमविवक्षितं अधेहि आ
धत्स्व अथवा पुत्रानिति बहुवचनं प्रतिगर्भं पुत्रप्रार्थनयेति तात्पर्यं ॥ मासीत्यत्र पद्दन्नो इत्यादिना
मासशब्दस्य मासीत्ययमादेशः । सूतवइत्यत्र तुमर्थे से इत्यादि सूत्रेण तुमुन स्तवे आदेशः ॥
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव । यत्कामास्ते [illegible] जुहुमस्तन्नो अस्तु वयं स्या
म पतयो रयीणां ॥ हे प्रजापते एतानि विश्वा विश्वा जातानि जनिमंति विद्यंते तानि वस्तूनि त्व
त्तोन्यः क[illegible]श्चिदपि न परिबभूव । परिपूर्तो भवतिः परिगृहार्थे वर्त्तते । न त्वदन्यः परिगृही
तुं समर्थः । यत्कामाः यत्कामयमानाः वयं ते तुभ्यं जुहुमः । तन्नो अस्तु तदस्माकं संपद्यतां । वयं
रयीणां धनानां नांतत्र यस्य मवीणां गाथिगाने सोमो नो राजावतु मानुषीः प्रजा नि विष्टब्धा सावि

ति। नो अस्माकं राजा सोमः मानुषीः मनुष्याः स्त्रियाः अवतु। सीमंतस्य प्रवृ[illegible] सां गर्भिणी सव
स्यर्थः। असौ ह समीपस्थ गंगादि नदी अस्ति विष्टव काजनार क्षार्थं अविस्य पस्वाचापिता मानु
षीभवेति त्राषः॥ जातकर्मप्रयोगः॥ पुत्रे जाते सचेलं स्नात्वा अन्यैः शिशुस्पर्शनानां नाभिच्छेदा
त्सुराजातमैककर्म कुर्यात्। तदानीं स्वस्तिवाचनं नां दीश्राद्धं कुर्यात्। एवं गुणेति जातस्य मम कुमा
रस्य गार्भिकबैजिक दोषनिबर्हणार्थं जातकर्म करिष्ये। कस्मिंश्चि द्भाजने सर्पिर्मधूनी समानी
य हिरण्येन वा यथा भवति। ताभ्यां नि घृष्य हिरण्येन दायप्रवेद दामीति मंत्रेण प्राशुं प्राशयित्वा
तद्धिरण्यं दक्षादि कर्णयोर्निधाय। भयत्र मेधां ते देवः सवितेति मंत्रं जपित्वा हिरण्यमाहि दानं दत्त्वा ॥१८॥
शिशोरुभयांसौ सक्रृदनिमन्त्र्य स्मा भवेंद्रः श्रेष्ठन्यस्मे प्रयंधीति मंत्रत्रयं जपित्वा हिरण्यादि
दानं दत्त्वा आशिषो गृह्णीयात्। इत्यादि पुराणे। देवाश्च पितराश्चैव पुत्रे जाते द्विजन्मनां। आया
न्त्यस्मात्तदहः पुण्यं पूज्यं च सर्वदा॥ तत्र दद्यात् सुवर्णं तु भूमिं गां तुरगं रथं। छत्रं छागं वस्त्रमाल्यं
शयनं वासनं गृहमिस्त्रकेवानू। एतत्कर्माशौचे मध्ये पि कार्यं। तदाह प्रजापतिः। आशौचे तु
समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति। जन

न समयेपि तत्संन्निधाने द्वादश्यादिशुभदिने कार्यं। कन्यायाअमंत्रकं कुर्यात्। तत्र समंत्रार्थः। प्र
ते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनां। आयुष्मान् गुप्तो देवताभिः शतं जीव श
रदो लोके अस्मिन्॥ हे शिशो ते तव मधुनः घृतस्य च एकदेशमिति विशेषः। तं प्रददामि। कीदृ
शं वेदं वेदयतीति वेदः। प्रज्ञा प्रददामित्यर्थः। पुनः कीदृशं सवित्रा देवेन मघोनां हविर्लक्षणा
नवतां धनवतां वा यजमानानां प्रसूतं प्रेरितं एवंभूतं प्रददामित्यन्वयः। त्वं देवताभिर्गुप्तो
रक्षितः सन् आयुष्मान् भूत्वा अस्मिन् लोके शतं शरदो जीव॥ मेधां ते देवः सविता मेधां देवी स
सरस्वती॥ मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजा॥ सविता देवः ते मेधामाधत्तां। यथा सरस्व
ती तव मेधामाददातु। दधातेः अत्र आत्मनेपदैकवचनं। पुष्करस्रजा हिरण्यय हिरण्यकमलस्र
ग्युक्तौ अश्विनौ देवौ अनेन मेधामादधत्तां ददातेः परस्मैपदे द्विवचनं॥ छ॥ अश्मा भव पर
शुर्भव हिरण्यमस्तृतं भव॥ वेदो वै पुत्रनामासि स जीव शरदः शतं॥ हे पुत्र अश्मा भव अश्मे
व त्वं स्थिरो भव। परशुर्भव परशुरिव दुरासदो भव। हिरण्यमस्तृतं भव। अस्तृतं मलेना

नाश्माद्भितं हिरण्यं भव। तेजोऽश्चादित्यस्तु वर्णेन दीप्तो भव। वेदो वै पुत्रसिद्धार्थः। वेदो धनं अथवा वेदवद्धर्मसाधने एवंविधस्त्वः पुत्रनामासि पुत्रनामयन्नमसि स त्वं शतं शरदो जीव॥ ७॥ इमं
कुमारं धयन्तु दीर्घमायुः प्रजीवसे। अस्येन्स्तनो प्रयुञ्जान आयुर्वेर्यं यशोबलं॥ इन्द्र श्रेष्ठानीन्यस्य
सौनको गृत्समद इन्द्रस्त्रिष्टुप्॥ इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे॥ पो
षं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नां॥ ॥ हे इन्द्र श्रेष्ठानि उत्तमानि द्रविणानि
धनानि अस्मभ्यं धेहि। तनूनामङ्गानां। यद्वा तायते इति गुह्यमिति तनवः पुत्राः तनोतेः कूरणोऽप्रत्ययः। तेषामरिष्टिं अहिंसां धेहि। तथा अस्मदीयदक्षस्य दक्षो भाव घञ्। क्रमेणः कूरणः ॥ ७॥
सामर्थ्यस्य चित्तिं ख्यातिं धेहि॥ अस्मे अस्मभ्यं सुभगत्वं सौभाग्यं वा निधेहि। रयीणां सया
दत्तानां धनानां पोषं समृद्धिं धेहि। तनूनां अङ्गानां। यद्वा तप तेः इति कुह्ममिति तनवः पुत्राः। तया
अस्मदीयाया वाचः स्वाद्मा अन्नस्वादुत्वस्य अह्नां सुदिनत्वं शोभनदिनत्वं च देहि। हे पूर्वी इन्द्रा दयो
देवा दृष्टं ते तानि सुदिनानि तेषां भावः सुदिनत्वं॥ ॥ अस्मे प्रयन्धि मघवन्नृजीषिन्निन्द्र राये।

विश्ववारस्य सूरेः ॥ अस्मे शतं शरदो जीवसे धा अस्मे वीरान् शश्वत इंद्र शिप्रिन् ॥ ॥ जातकर्मणि अंशा
मि मन्त्रेणैव विनियुक्ता मघवन् धनवन् ऋजीषिन् हे इंद्र विश्ववारस्य विश्वैः सर्वैः संभजनीयतया व
रणीयस्य सूरेः हरिवाहूरायो धनं ॥ द्वितीयार्थे षष्ठी अस्मे अस्मभ्यं प्रयंधि प्रयच्छ ॥ किं च अस्मे
अस्माकं जीवसे जीवनाय शतं शरदः संवत्सरान् धाः धेहि ॥ हे शिप्रिन् शोभनहनो इंद्र ॥ अस्मे अ
स्मभ्यं शाश्वतः बहून् वीरान् पुत्रं धेहि ॥ जीवसे जीवप्राणधारणे इत्यस्य तुमर्थे असेन् प्रत्ययः ॥ प्रत्यय
स्वरः ॥ ७ ॥ इति जातकर्म ॥ ७ ॥ अथ नामकर्म ॥ नाम्नः करणं यस्मिन् कर्मणि तन्नामकर्म ॥ पिता स्व
सूनो द्वादशादि शुभदिने स्वस्तिवाचनपूर्वकं नांदीश्राद्धं विधाय ॥ ध्रुवं गुरोति ममकुमारस्य गर्भबी
जदोषक्षयार्थं नामकरणं करिष्ये ॥ मासनक्षत्रनामपूर्वकं पितामहादीनां कुलदेवतानाम कन्याक्ष
रं त्रिष्विति सन्नामा शर्मेति वा ब्रूयात् वाभिधानाभिवादनीयं नाम असौ देवदत्तशर्मा इति ब्रूयात् ॥ स्त्री
स्त्रः ॥ स्त्रीणां लघुपुण्याक्षरं सुघोषं दीर्घवर्णान्तं नाम दद्यात् ॥ इदमभिवादनीयं आमौंजिबंधनात् गुरु
तरौ नाद्वारयेतां ॥ पुत्रशिरः परिगृह्य अंगादंगादिति जपित्वा त्रिर्मूर्धन्यवघ्राय ब्राह्मणान् संपूज्य स्व
स्य स्मे देवदत्ताय ब्रूते स्फस्फा तेभ्यः आशिषो गृह्णीयात् ॥ अंगादंगात्संभवसि हृदयादधिजा

यसे॥ आवेपुत्रनामासि स जीव शरदः शतं॥ स्त्रिपंयोगे बलुवताप्रयत्नेन सर्वांगीणं रेतो निषिच्यते। अत
द्दमुच्यते। अंगादंगात्संभवसि हृदयंगामस्याधिष्ठानं तेन तस्य पुनर्वेवनं हृदयादधिजायसे आधिं पं वस्य
र्थानुवादी एतत् स पुत्रनाममात्मैवासि अस्मि द्धे शतं शतं शारदो जीव अथ मूर्धाव घ्राणयोः॥ इति नामकर
णं॥ छ॥ चतुर्थे मासि पुण्यर्क्षे शुक्ले निष्क्रमणं॥ छ॥ मतांतरेणं दशमेहनि तृतीये मासि वा शुभेहनि कुमा
रं स्नात्वा स्वलंकृत्य स्वस्तिवाचनपूर्वकं नांदीश्राद्धं कुर्यात्॥ कुमारस्य गर्भबीजदोषपरिहारार्थं निष्क्रमणं करि
ष्ये इति संकल्प्य देवालयं गत्वा देवतामभ्यर्च्य विप्रेराशिषो वाचयित्वा देवताग्रे दक्षिणां कारयित्वा मातृष्व
स्रमातुल्यादिगृहं नीत्वा तदीयाशीर्भिर्हि वा सूर्यचंद्रमसौ दर्शनं कारयेत्॥ एवं कुमार्यै॥ छ॥ अथ कर्ण
वेधः॥ कार्त्तिके पौषमासे वा चैत्रे वा फाल्गुनेपि वा॥ कर्णवेधं प्रशंसंति शुक्लपक्षे शुभे दिने॥ तत्रापि स्व
स्तिवाचनपूर्वकं नांदिश्राद्धं कृत्वा पूर्ववत्संकल्प्य कर्णवेधनं कुर्यात्॥ उक्तं॥ शिशोरदंतजातस्य मा ॥१०॥
तुरुत्संगसर्पिणः॥ सौचिको वेधयेत्कर्णौ सूच्या द्विगुणसूत्रयति॥ ज्योतिषे॥ विप्रानभ्यर्च्य आशिषो गृह्णी
यात्॥ एवं कुमार्याः॥ इति कर्णवेधः॥ छ॥ अथान्नप्राशनं॥ षष्ठे मासि शुभदिने स्वस्तिवाचनं नांदि
श्राद्धं कृत्वा कुमारगर्भबीजदोषपरिहारार्थं सर्वार्थसिध्यर्थं अन्नप्राशनं करिष्ये। अलंकृतं कुमा

रं देवतासंनिधौ मातुरुत्संगउपवेश्य स्वर्णपात्रे दधिमधुघृतक्षीरस्वर्णमिश्रं पायसं निधाय घृते ददामि
तुरीं तपर्णं ॥ देशाद्दारभ्य दक्षिणं । अदितिः केशान्वपतु इति दक्षिणे केशपक्षे । ओषधे त्रायस्वेनमि
ति मंत्रेण सकेशं छित्वा छिन्नाग्रच्छेदनं प्राग्भूमीपरि एकीकृत्य मात्रे प्रयच्छति ॥ माता तं नानलुहे गोमये
निदधाति ॥ द्वितीयतृतीयचतुःछेदनेपि जलनिधानादि समानं ॥ द्वितीयछेदने येनधातेति मंत्रः ।
तृतीये येनभूयश्चेति । चतुर्थे छेदने इमेत्रयो मंत्राः ॥ एवमेवोत्तरपक्षे त्रिभिर्मंत्रैश्छित्वा रंछित्वा ।
यत्क्षुरेणेति मंत्रेण गत आरभ्य मूलं क्षुरधारां निमृज्य । शिरोनाभिमंत्रेण नापितं प्रेष्य स्व
ऋषिसंज्ञया शिखाकारयित्वा । स्नाप्यानीय स्विष्टकृतादि होममशेषं समापयेत् ॥ व्रीह्यादिपूर्ण
निपात्राणि नापिताय प्रयच्छेत् ॥ कुमार्या एतदमंत्रकं कुर्यात् ॥ हारितः ॥ एतेषै पत्नोपेतु पादकृत्स्नं स
माचरेत् ॥ लुप्ते चौले त्वर्थकृच्छ्रं द्विगुणं स्यादनाहिते ॥ इति चौलकर्म ॥ अथास्य मंत्रार्थः ॥ एह्यग्ने
स्य राहूगणो गोतमो ग्निस्त्रिष्टुप् ॥ एह्यग्न इह होता निषीदादब्धः सुपुरएता भवा नः ॥
अवतां त्वा रोदसी विश्वमिन्वे यजामहे सौमनसाय देवान् ॥ हे अग्ने एहि आगच्छ इह अस्मिन् ।

यज्ञे होता सन्नीषीदउपविश्य। नो अस्माकं पुर एता। पुरतो गंता। सुभव। सुष्ठु भव। यस्मात् त्वं अ
दब्धः राक्षसादिभिः अहिंस्योऽसि तात् त्वं विश्व मिन्वे सर्वं व्याप्नुवन्त्योः रोदसी द्यावापृथिव्यो वा त्या
मवतां रक्षतां। आगस्योपविश्य पृथिवीभ्यां रक्षितस्य सन् महे महते सौमनसाय सौमनस्याय दे
वान् दानादिगुणयुक्तानिंद्रादीन्यज॥ हविर्भिः पूरय। सौमनसाय सुमनसो भवः सौमनसं तस्यै
दमिभूतिसंबंधः। आमान्ये अणूस्य चात्र भावलक्षणे संबंधिविशेषपर्यवस्यस्मि। अभिप्रातिष्ठायां॥ १०
जुष्टो दमूनात्यस्यात्रेयो वसुश्रुतोग्निस्त्रिष्टुप्। जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान्।
विश्वा अग्ने अभियुजो विहत्या शत्रूयतामाभरा भोजनानि॥ ॥जुष्टः पर्याप्तः दमूनाः दममनाः दांतमना वा ॥११॥
अतिथिः तद्वत्पूज्यश्च सन् इमं नोऽस्मदीयं यज्ञमुपयाहि उपगच्छ विद्वान् ज्ञातावान्। हे अग्ने विश्वा अभि
युजः अभियोक्तॄन् द्वेष्टॄन् विहत्य शत्रूयतां तेषां भोजनानि अन्नानि धान्यानि व आभर आहर॥ १२॥
चौलकर्मे उपनयने गोदाने विवाहे प्रधानहोमे अग्न आयूंषि त्वस्य त्रातं वैखानसा ऋषयः॥ गायत्री छंदः॥
अग्न आयूंषि पवस आसुवोर्जमिषं च नः॥ आरे बाधस्व दुच्छुनां। अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः।

तमीमहे महागयं॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं॥ दधद्रयिं मयि पोषं॥ हे अग्ने पवमान रूप त्वं अस्मा
कमायूंषि पवसे नो अस्माकं ऊर्जमन्नं रसं इषमन्नं वा सुव अभिमुख्यं नयेरय॥ किंच॥ दुछुनां रक्षसनामैतत्॥
रक्षांसि अरे अस्मत्तो दूरं एव बधस्व पीडय॥ ॥अग्निरृषिरिति॥ पांचजन्यः निषादपंचम्याश्चत्वारो वर्णाः
पंचजनाः॥ यद्वा गंधर्वाः पितरो देवा वा असुरा रक्षांसि इत्येते पंचजनाः॥ अथवा देवमनुष्या गंधर्वा अप्स
रसः सर्पाः पितर इति ब्राह्मणे विहिताः पंचजनाः तेषां तत्तदभिष्टप्रदानेन स्वभूतः ऋषिः सर्वस्य द्रष्टा प
वमानः पवमानोग्निः पुरोहितः कर्मण्यग्रे त्विग्भिः पुरो निहितः तं पूर्वोक्तलक्षणं महागयं महद्भिरपि
देवादिभिर्गातव्यं॥ महांति गृहाणि यस्य गृह्योपि यस्य सः तथोक्तः॥ तं पवमानगुणविशिष्टमग्नि
मीमहे याचामहे॥ अग्ने पवस्व स्वपा इति॥ हे अग्ने स्वपाः शोभनकर्मा त्वं॥ अस्मे अस्मासु
सुवीर्यं शोभनवीर्योपेतं वर्चः॥ वर्चो दीप्तिस्तेजः॥ पवस्व॥ आगमय॥ तथा सत्त्वान्त्वं रयिं धनं पुत्रं वा पोषं पुष्टि
तेः कर्मण्येवायुत्त्रा गवां पुष्टं यद्वा गवादिकं मयि भवान् दधत् दधातु करोत्वित्यर्थः॥ दधत्तेर्लेटि॥ अडागम
मेघो लोपो लेटि॥ वस्य कार लोपः॥ उशना पत इति त्र्यृचं सीमन्ते व्याख्याता॥ उष्णेन वाय उदकेनेहि॥ हे वायो
उष्णेन उदकेन उष्णउदकं गृहीत्वा एहि आगच्छ॥ अदितिः केशान्वपत्वाप उंदन्तु वर्चसे॥ अदित्याः वपते

अनुग्रहकर्तृत्वं आपउंदंतुमाणवकस्य शिरः उंदंतुक्लेदनं तु व वेसदीपये ।। ओषधे त्रायस्वैनं। स्वधिते मैनं
हिंसीः। हे ओषधे बर्हिरस्मिके एवं माणवकं त्रायस्व रक्ष। स्वधिते व्यवधानमेव रक्षणं। बर्हिषः स्वधिते
मैनं हिंसीः। हे स्वधिते स्वस्मिन्प्रयोजने येषु निरवस्थानमस्येति स्वकार्यसमर्थः। धिट् आधारे ।।
स्वधिते। क्षुरः एनं मा हिंसीः। हिंसा प्रति बधो वक्षुरत्र मा दाः पा ।। येनावपत्सविता क्षुरेण सोमस्य रा
ज्ञो वरुणस्य विद्वान् ।। तेन ब्रह्माणो वपतेदमस्यायुष्मान् जरदष्टिर्यथासत् ।। येन क्षुरेण सविता देवः
सोमस्य राज्ञो वरुणस्य च शिरो वपतु। कीदृशः। विद्वान् नापितकर्मणि कुशलः। तेन क्षुरेण क्षुरत्यजा ॥१२॥
त्या एका। तादृशेन क्षुरेण हे ब्राह्मणाः अस्य माणवकस्य इदं शिरो वपत। वते माप्रयुद्धं युष्मदनुज्ञया
वपनस्थानीयके शानछ्छिना स्मिन्स्यर्थः। यथा वपने सत्स्वयं माणवकः। आयुष्मान् जरदष्टी श्च प्रशस्ता
वार्धक्यो नीतिश्रानो वा यथा स्यात् ।। बृहस्पतेरग्नेरिंद्रस्य वायुषा तेन अयुषे वपामि सुश्लोक्याय
स्वस्त्यय इति। येन क्षुरेण धाता बृहस्पतेरग्नेरिंद्रस्य च शिर आयुषे अवपन्। हे माणवक ते शि
रः। आयुषे आयुर्वृद्ध्यै सुश्लोकः सुकीर्तिः तस्य भावः सुश्लोक्यं तस्मै यथायं सुकीर्तिः स्यात् स्व

स्वेय अधिना शायस्ववपामि ॥ येन भूयश्चरात्यां ज्योक्च पश्याति सूर्यं । तेन त आयुषे वपामि सुश्लोक्या
य स्वस्तये इति । येन क्षुरेण वपनीयं माणवकः भूयो भूयश्चिरं चरातीति लेट् भूयश्चिरं चरेत् । आमेवं ज्योक् । दी
र्घकालं लेट् । सूर्यं पश्याति । पश्येत् लेट् । एतेन तत्कार्थः । यत्क्षुरेण मर्चयथा सुपेशसा वप्ता वपासि केशा
न् ॥ छिंधि शिरो मास्यायुः प्रमोषीरिति । हे क्षुराधिदेवते वप्तात्वं यत् यदा मर्चयता तीक्ष्णत्वात् संय
यता सुपेशसा सुरूपेण उक्तेन क्षुरेण स्वत्म भूतेन केशान् वपसि तथा अस्य शिरः मा छिंधि आयु
श्चास्य मा प्रमोषीः वपनस्य स्वच्छतो मंडलत्वादेव प्रार्थ्यते ॥ ८ ॥ शुंधि इति पाठे । अस्य शिरः शुंधं कु वी
त्यर्थः ॥ ६ ॥ इति चौलकर्म ॥ ८ ॥ अथोपनयनं ॥ नियमपूर्वकं उप आचार्य समीपं नीयते माणवको अ
स्मिन् कर्मणि तदुपनयनं ॥ उदगयनाद्युक्तकाले शुभदिने प्रातः पूर्वेद्युः स्वस्तिवाचनं नांदीमुखं वि
धाय अपरेद्युः कृतस्नानमलंकृतं कुमारमाशीर्भिः पूर्यंरयित्वा आमगोः सहभोजयित्वा शिरोवपनं
स्नानं च कारयित्वाऽग्नेः तिः शास्त्रविदुक्ते शोभने मुहूर्ते तं कुमारमंके स्थाप्य पुनः निरीक्ष्य तं स्वदक्षिणे
उपवेश्य तस्य कालमध्वारादि दोषपरिहारार्थं तद्दाभिपूर्वेद्युः कानि चित् कृच्छ्राणि वा हिरण्य दक्षिणा साम्नायरूपाय
[illegible] स्था यथाशक्ति दत्वा मनवसंख्या । तं तु रूपवितस्थाने धारयित्वा शाखाग्निं व्याहृत्या प्रतिष्ठाप्य कुमारेण न्वा

रश्रुंभस्त्वा प्राणानायम्य संकल्प्य। अस्य कुमारस्य गर्भबीजदुरितक्षयार्थं उपनयनहोमं कर्तुं तदंगमन्वाधानं
करिष्ये। तत्र देवतापरिग्रहार्थं इध्माघारावाज्येन मुखे अग्निं पवमानमिति त्रिभिः। प्रजापतिं एताः प्रधा
न देवताः अज्येन शेषेण स्विष्टकृतमग्निमित्यादि भूर्भुवः स्वरां तमुखे समिद्द्वयमाधाय परिसमूहनादाज्य
संस्कारांतं कृत्वा कुमारमहतेन वाससा परिधाप्य गाईत्रं वस्त्रं कृष्णाजिनं वा प्रावरणार्थं दत्वा यज्ञोपवीतं तथा
13 रयित्वा अत आचार्यस्य पश्चात् स्थित्वा अग्निं यज्ञपात्राणि वोत्तरतः आचांतं यज्ञपात्राणि पश्चादग्निमात्मानम
तरेणानीय दक्षिणे उपवेश्य बर्हिरास्तरणादि स्रुवसंमार्जनांतं कृत्वा ब्रह्मचारिणा समन्वारब्धः स्वाघारांतं कृ
त्वा। अग्न आयूंषि पवस इति तिसृभिः प्रजापतिरिति प्रधानपंचाहुतीर्हुत्वा ततः आचार्योग्नेरुत्तरतः प्राङ्मुखस्ति ॥१३॥
ष्ठन् माणवकस्य आत्मनोऽग्नेश्च मध्ये वायमकुर्वन् उत्तरतो गत्वा प्रत्यङ्मुखस्तिष्ठन्। अथाचार्यो ब्रह्मचा
रिणः अंजलिमद्भिः पूरयेत्। आचार्यः तत्सवितुर्वृणीमह इति मंत्रेण स्वांजलिं कुमारांजलौ निनीयाद्देवस्य त्वे
ति मंत्रेण ब्रह्मचारिणः सांगुष्ठं पाणिं गृहीत्वा असौ शर्मन् इत्यनेन ब्रह्मचारिणो नाम संबुध्यंतं वदेत्। पुनरपि
अंजलिनियनं तं पूर्ववत् कृत्वा सविता ते हस्तमग्रभीत् इति मंत्रेण हस्तं गृहीत्वा नाम वदेत्। पुनरप्यं
जलिनियनं तं कृत्वा अग्निराचार्यस्तवेति मंत्रेण हस्तं गृहीत्वा पूर्ववन्नाम वदेत्। ततः आचार्यो देवस
वितुरिति मंत्रेण आदित्यं दर्शयित्वा [illegible] प्रजापतये परिदाय युवा सुवासाः कुमारं दक्षिण

वत्तंग्रहङ्गुरवं कृत्वा। अस्यां सयोरुपरिपाणी कृत्वोत्तरार्धेन हृदि स्पृशेत्। ततो यथागतमुपविश्य प
पुं द नोक्षणे विना संकल्प्य अग्नये समिधमित्यनया समिधं हुत्वा हस्तं प्रक्षाल्याग्निमुपस्पृश्य।
तेजसा मेति मंत्रे ओष्ठौ विलोमकौ संवृतौ कृत्वा मुखमेव मार्ष्टि त्रिरेव मेव मार्ष्टि। अथ मयि
त्यादि षड्भिर्मंत्रैर्हविर्भुजमुपस्थाय दक्षिणं जान्वा आचार्यस्य पादावुपसंगृह्याभिवादनीयं ना
मोक्तास्वस्य शिरो वनम्य अधिहीत्यादिकं प्रैषं ब्रह्मचारी ब्रवीति। तत आचार्यो ब्रह्मचारिणः परि
धनीयवाससा आत्मनः पाणिभ्यां बपाणी गृहीत्वा ऋषिदेवतछंदः प्रणवव्याहृतिपूर्वकं गायत्रीप
ठा वाचयेत्॥ ततो अर्धर्चमर्धर्चं ततो छ्छः ततआचार्यः कुमारे हृदयसमीपे ऊर्ध्वांगुलिं पाणिं निधा
याम मव्रते [illegible] इति मंत्रं जपेत्॥ ततउत्तरतोग्नेः मौञ्जी मेखलां भियं दुरुक्तादिति द्वाभ्यां मंत्राभ्या
माबध्य केशसंमितं [illegible] दंडं च दत्वा ब्रह्मचर्यमादिशेत्। ब्रह्मचार्यसीत्यादि वेदमधीष्वेत्यंतं ब्र
ह्मचर्यनियमानादिश्य द्वादशवर्षाणि इत्यादिकालं निर्दिश्य। तं दक्षिणात आनीय। स्विष्टकृ
तादि परिषेचनांतं कृत्वा। अथ ब्रह्मचारी। अप्रत्याख्यायिनं भवान् भिक्षां ददात्विति याचयेत्।
अथवा भवाननुप्रवचनीयं ददात्विति [illegible] याचयेत्। अप्रत्याख्यायिनी वा भवति भिक्षां ददा

त्विनियावयेत्। व्रीह्याद्यन्यतमं लब्ध्वं पुरवेतं न्निवेद्य अहःशेषं तूष्णीं तिष्ठेत्। तस्य माध्याह्निकानुष्ठा
नं नास्ति। इत्युपनयनं॥ अत्र मंत्रार्थः॥ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्॥ आ
युष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥ यज्ञस्य विष्णोः परमात्मनः उपसमीपे वित
विविधामागतं जीवस्वरूपं परमं उत्कृष्टं पवित्रं सर्वपावनं प्रजापतेः प्रजानां पालयितुः संबंधीति
शेषः। यत्प्रसिद्धं सर्वयज्ञेकारणं। सहजं स्वभावभूतं अथवा देहेंद्रियादिभिः सहोत्पन्नं। पुरस्ता
त्पूर्वं। ज्ञानादिति यावत्। आयुष्यं आयुष्यवत्। अग्र्यं श्रेष्ठं। प्रतिमुंच। सर्वतः अविद्यादिभ्यो मोचय।
शुभ्रं उज्ज्वलं कर्तृत्वादिविनिर्मुक्तमित्यर्थः। यद्धृदि चैतन्ये जीवभावः तत्प्रतिमुंचेति योज्यं। यस्माद्दे
वं हृदि चैतन्ये तिष्ठति यज्ञोपवीतं तस्माद्धृदयस्योपरि बहिर्विधार्यमाणं वैवर्णिकैरिदं यज्ञोपवी ॥१८॥
तं स्नानस्थत्वात्॥ कार्पासादिसूत्रमपि यज्ञोपवीतं तद्वत्कं। वीर्यं बलं कर्मकारणं बलं स्कंभयात्।
तेजः ब्रह्मवर्चसं वर्द्धयं भूयादिति योज्यं। यस्माद्बाह्यमपि यज्ञोपवीतं यज्ञोपवितसामीप्यत्त
स्मादेवमेव रूपं कर्तृत्वादिविनिर्मुक्तं मोक्षयोग्यं हृदयकमलस्थे देशकालवस्तुपरिच्छेदशून्ये
स्वयंप्रकाशे चैतन्यैकरसे वर्तमानं मुख्यं यज्ञोपवीतमिति तात्पर्यार्थः॥ ॥अंजलीप्रदाने॥७॥

तत्सवितुर्वृणीमहे वयं देवस्य भोजनं ॥ श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि ॥ अस्य आत्रेयः श्या
वाश्वः सविता । अनुष्टुप् ॥ अत्र ब्राह्मणव्याख्येन भोजनं भोगयोग्यं । धनं वयं स्तोतारो वृणीमहे । प्रार्थया
मः । कस्य धनं । सवितुः सर्वप्रेरकस्य देवस्य स्वभूतं तत् कुत्र । श्रेष्ठं । प्रशस्यं । सर्वधातमं सर्वभोग
प्रदमित्यर्थः । तुरं शत्रूणां हिंसकं धनेन वा शत्रून् हन्तुं समर्थं स्यात् । ईदृशं धनं भगस्य भज
नीयस्य सवितुः अनुग्रहाद्धीमहि धारयामः । उपभोगं करवामेत्यर्थः । अथवा धनं वृणीमहे
आर्षेयं ब्राह्मणे मध्ये ॥ ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां । हस्तं गृह्णा
मि ॥ हे देवदत्तशर्मन् अग्निः सविता ते हस्तमग्रभीदसाविति सविता देवः ते तव हस्तमग्र
भीत् । अग्रहीत् । ग्रहहोर्भश्छन्दसीति हकारस्य भकारः । हे देवदत्तशर्मन् अग्निराचा
र्यस्तवासाविति अग्निस्तवाचार्यः अवाचार्यस्थानीयः हे देवदत्तशर्मन् । सूर्यदर्शनं । देवसवि
तरेष ते ब्रह्मचारी तं गोपाय स मा मृत त्वाचार्यः । हे सविता । देव एनं ब्रह्मचारी तेन वत्वदधीन इत्य
र्थः । तं गोपाय रक्षस्व स मामृत मरणं मागमत् ॥ परिदानेकस्य ब्रह्मचार्यसि प्राणस्य ब्रह्मचार्यसि ॥
कायस्त्वा कमुपनयते काय त्वा परिददामि ॥ हे माणवक कस्य प्रजापतेः संबंधी ब्रह्मचार्यसि ब्रह्म

वेदः तदर्थे ब्रह्मचारी॥प्राणस्य जीवात्मनः संबंधी ब्रह्मचार्यसि कः प्रजापतिः कं ब्रह्मचार्यावरणात् ब्रह्मरूपं त्वां
त्वां उपनयते नियतं त्वां आत्मनः समीपं प्रापयति॥उपनयनकर्त्तापि प्राजापतिस्वरूप इत्यर्थः॥अतः का
यः ब्रह्मणे त्वां परिददामि॥कुमारव्यावर्त्तते॥युवा सुवासाः इत्यस्य गाथिपुत्रो यूपश्त्रिष्टुप्॥युवा सु
वासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः॥तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा
15 देवयंतः॥ ॥युवा अष्टांगानि लक्षणलक्षित इत्यर्थः॥सुवासाः शोभनेन वाससा युक्तः॥परिवीतः
तथा रशनया परिवेष्टितः एवं विधा यूपमागात्॥आगच्छति सः उ अ एव यूप श्रेयान्॥जायमानः॥
सर्वेभ्यो वनस्पतिभ्यः उत्कृष्टतया संपद्यमानो भवति तमेवं विधं यूपं धीराः स प्रज्ञा मनसा देवयं
तः देवान् कामयमानाः स्वाध्यः सुष्ठु सर्वतो ध्यानयुक्ताः॥कवयः क्रांतदर्शिनाऽध्वर्य्यादयः उन्नयंति ॥१५॥
उन्नयंतं कुर्वंति॥ ॥ब्रह्मचार्य यज्ञकार्य॥अग्नये समिधमहार्षं बृहते जातवेदसे॥तया त्वमग्ने व
र्धस्व च समिधा ब्रह्मणा वयं स्वाहा॥अग्नये तुभ्यं समिधमधमहार्ष आहरामि कीदृशाय बृहते प्र
भावतो महते॥जातवेदसे।जातधनाय जातप्रज्ञाय वा।हे अग्ने त्वं तया समिधा वर्धस्व च।वयं ब्राह्म
णाः तु हुमः॥स्वाहा।इदं समित्लक्षणं हविः स्वाहुतमस्तु यत्पुरुषात्प्रसादपात्रत्वादेकस्मिन्

अपि बद्धत्वाभिनमः। तेजसामासमनज्मीति हे अग्ने भगैव तेजसा मा मासमनज्मि लिंपामि व्याप्तं करोमि॥ मयि मे
धां मयि प्रजां मयि अग्निस्तेजो दधातु। मयि मेधां मयि प्रजां मयि इंद्र। इंद्रियं दधातु। मयि मेधां मयि मे प्रजां म
यि सूर्यो भ्राजो दधातु। अग्नि मयि मेधां मयि प्रजां तेजश्च दधातु। इंद्र इंद्रियं सामर्थ्यं दधातु। सूर्यः भ्राजो दी
प्तिः दधातु। यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं। यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासं। यत्ते अग्ने हरस्ते
नाहं हरस्वी भूयासं॥ हे अग्ने तेन व तेजः कांतिरूपं तेनाहं तेजस्वी कांतिमान् भूयासम्। एवं वर्चस्तो
हरो रश्मिरूपं तेजः शिष्टं स्पष्टं॥ ॥विभूतिग्रहणे॥ मानस्तो। कुत्सस्य आंगिरसः कुत्सो रुद्रो जगती॥ मा
नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः॥ वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतो न
मसा विधेम ते॥ हे रुद्र। नोऽस्माकं तोकादि विषये मा रिषः मा हिंसीः। तोकः शब्दः पुत्रवाची। तनयः। स्तत्पुत्रः
आयुरं तो दत्तो मनुष्यनाम। पुत्रपौत्रव्यतिरिक्तो याऽस्मदीयो मनुष्यः तस्मिन्नपि हिंसामा कृथाः॥ तथा हे रु
द्र वीरान् शौर्यान् भामिन दां तान् अस्मदीयान् भामिनः क्रुद्धान् मा हिंसीः। वयं वह हविष्मंतः हविर्भि
युक्ताः संतः सदमित् सर्वदैव त्वा हवामहे॥ ॥विभूतिधारणे॥ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुष
अगस्त्यस्य त्र्यायुषं। यद्देवानां त्र्यायुषं। तन्मे अस्तु त्र्यायुषं शतायुषमिति॥ त्र्यायुषमिति कौमारयौव
नस्थावीरात्रीणि आयूंषि तेषां समाहारः त्र्यायुषं यत् जमदग्नेः मुनेवन्न ममाप्यस्तु एवं कश्यपादी

बुधोऽयं। एवं मम शतायुष्यमस्तु॥ ओं वम इति स्थालीपाके व्याख्यातं॥ सावित्री प्रदाने अधिहि भोः सावित्रीं सा अ
नुब्रूहीति। अध्यापय। सावित्रीं सा अनुब्रूहि अनुग्रहबुध्या वद। द्विरामंत्रणमादरार्थं॥ प्रणव सप्तव्याहृति
गायत्रीशिवसामर्थ्यादुच्यते॥ प्रणवस्वरूपं तावदुच्यते। प्रजापतिः भूरादिलोकान् सृष्ट्वा तत्राग्निवा
य्वादित्यान् सारमुद्धृत्य तेभ्योऽपि सारं वेदानुद्धृतवान् तेभ्यः सारं व्याहृतीरुद्धृत्य ताभ्योऽपि सारं अकार उकार मका
16 रानुद्धृत्य तानेकधा समभरत् तदेतदोमिति ज्योतिर्यामिति वेद तत्र प्रजापतिरकामयतेति श्रुतिरिति प्रपंचितं।
प्रणवस्य अजपाप्रकृतित्वात्तस्य एवं प्रणवार्थः। तथोक्तं मंत्रशास्त्रे। सकारं च हकारं च लोपयित्वा
प्रयोजयेत्। संधिं वै पूर्वरूपाख्यां ततो सौ प्रणवो भवेत्॥ तत्र तत्र बृहत्कृतिके च सावित्रिशब्देन सच्चित्सुखात्म
कं ब्रह्माभिधीयते स एव प्रणवार्थः॥ अहमिति सर्वसाक्षिप्रत्यगात्मतया सामानाधिकरण्येन वक्तव्यं एवं स ॥१६॥
ति अखंडैकरसभावं सच्चित्सुखात्मकं परब्रह्माभिधीयते॥ स एव प्रणवार्थः॥ तथोक्तं गीतायां। तत्सदिति
निर्देशो ब्रह्मणस्त्रिविधः स्मृतः॥ एवंविधः प्रणवः। सर्वकर्मसु मंत्रादौ स्थानत्रयेण वक्तव्यः। स त्र सर्वेषु
रूपार्थं साधयति तथा चोक्तं गीतायां॥ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः। प्रवर्तंते विधानो
क्ताः सततं ब्रह्मवादिनामिति॥ ॥अथ व्याहृतीनामर्थः। भवत्यस्मिन् भूतानीति भूः। अंतर्भा
वितण्यर्थादस्मान्निर्गुणा भवत्योदसः। उवटादेशः। स्वः सुष्ठु अरणीयं स्वात्सुखमस्मिन् प्राप्य

तइतिवा स्वः॥ सुशब्दोपसृष्टादर्तेः अकर्तर्यपि प्यात्पयेन व्यवहृायुणदेशः एतेषामर्थैः। प्रणवा
र्थप्रतप्रसंगादुक्तरव्याहृतीनामर्थ उच्यते॥ महः मह पूजायां सर्वेषां सर्वप्रकारैः पूज्यं महः। सर्गेका
ले वियदादि सर्वं यस्माज्जनयतीति जनः। तपः तप आलोचने सर्वलोकेचपितः सर्वदा सर्वस्य प्रशास्तृ
त्वेन तापकं चेति तपः। सत्यं। अविपर्ययस्वभावं। कचिद्देशे काले वा केनापि प्रमाणेनानाविधं सत्यं॥
16 आसां सप्तव्याहृतीनां प्रत्येकं सत्तास्वभावादिरूपार्थस्यैकत्वात्॥ परमात्मतत्त्वप्रतिपादकत्वात्ताद
शेन प्रणवेन प्रत्येकमस्ति संबंधः। एवं गायत्र्यार्थस्यापि प्रणवार्थैरैकत्वं॥ ॥ तत्सवितुर्वरेण्यस्य गा
धीपुत्रो विश्वामित्रः सविता गायत्री। सवितुः सर्वस्य लोकप्रसवितुः। सवितृशब्दोपलक्षितस्य मायाव्य
दासायस्वरूपलक्षणमाह। देवस्य द्योतमानस्य स्वयंप्रकाशाद्विदेकरसस्य वेदांतमाहावाक्यतात्प
र्यविषायत्वासिद्ध्येजिज्ञासस्यत्वसिद्धयेव अनंतानंदस्वरूपत्वमाह॥ वरेण्यं सवितुर्देवस्य वरे
ण्यं रूपं वरणीयं सर्वैः प्रार्थनीयं सुखैः कृतानुरूपं सर्वैः सुखस्य प्रार्थनीयत्वात्॥ एवंविधस्वरूपस्य स
मूलं संसारदाहकत्वमाह॥ भर्गः सच्चिदानंदैकरसनिर्गुणं परमात्मरूपं प्रकृतिप्राकृतात्मकं संसा
रभर्गः दहकं सांतायं शब्दः एवंविधं तत्त्वमेव कार्यकारणनिस्वमायया स्रष्टुं जलचंद्रवत्तंतु

प्रविश्य जीवाख्यं लब्ध्वा तं प्रदाश्मि ध्येयं सन् बुध्यादिप्रेरकत्वेनावस्थितमित्याह॥ धियो यो नः इति। यः परतत्त्वी
यलिंगस्थानेषु लिंगानि देशाः यत्र एवंविधं तत्त्वतः अस्माकं मनः आदि करणद्वारैः मंतव्य बोद्धव्य विविषयाः
शब्दादिविषयेषु धियः धीवृत्तीः प्रचोदयात्। सदा प्रेरयति तद् बुध्यादिप्रेरकं। सवितुः देवस्य वरेण्यं परमा
17 नंदं भर्गः स्वप्रभं संसारदाहरूपं निर्गुणं रूपं धीमहि ध्यायेमहि॥ ८ ॥ एवं प्रणवव्याहृतिगायत्रीण
मेकार्थत्वं प्रदर्श्य इदानीं तच्छिरसोऽर्थमुच्यते। आपो इत्यादि ओमित्यन्तोऽर्थः। आपः आप्नोतीत्यापः। अ
खंडसत्तास्वरूपेण सर्वव्यापकः स एव ज्योतिः स्वयंप्रकाशनात् ज्योतिः स एवानंदस्वभावः अमृतं
न देवामृतं। अमरणधर्मकं ब्रह्म तत् देव न तद् देवदेशतः कालतो वस्तुतश्च अवच्छिन्नमेवाहृतार्थ ॥ ७ ॥
स्य व्याहृतित्रयार्थैक्यमाह। भूरित्यादि। तेषामर्थः ओक्षः। सप्रणवव्याहृतिगायत्रीशिरसां प्रति
पादितमखंडैकरसं स्वभावमर्थं परं ब्रह्मैवेत्यंगिकारो ओमिति॥ हृदयाक्षि मर्शीने। मम व्रते हृद
यं ते ददामि मम चित्तमनुचित्तं ते अस्तु। मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यं॥
हे ब्रह्मचारिन् ते तुभ्यं व्रतनिमित्तं तव व्रतावरणार्थमित्यर्थः। मम हृदयं ददामि हृदयं मनः तत्सर्वकमनुज्ञां
ददामीत्यर्थः। ते चित्तं मम चित्तं अन्वस्तु मच्चित्तानुसारी भवतु किं चित्तं मम वाचं माज्ञारूपां एवं व्रतः

सन्त्कवलमदाशाकरणमेवव्रतंनियमोयस्यसतादृत्तः।सन्नुषस्यचजीत्यासेवस्यबृहस्पतिः।वाचस्पति
देवः।ब्रह्मवर्चसदानकर्ता।त्वंत्वांमह्यंनियुङ्क्ते।नकुर्मितरांयो।अयतुमदामयाज्ञाकलेनब्रह्मण्येसंब्रह्मवर्चसं
समृद्धंभवतीत्यर्थः।।बृहस्पतिब्रह्मवर्चसदातृत्वात्।बृहस्पतेअतिअदर्यो अर्होदितिश्रुतं।। ।।मौञ्जीबंध
ने।।इयंदुरुक्तात्परिबाधमानावर्णंपवित्रंपुनतीनआगात्।।प्राणापानाभ्यांबलमाभरंतीप्रियादेवानांसु
भगामेखलेयं।।इयंमौञ्जीदुरुक्तात्दुरुक्तानिपरिबाधमानासर्वतोनाशयतिशर्मेगृहंवरूथंवरणीयंपुन
तीनः।अस्मान्आगात्।आगच्छतु।आगतवती।प्राणापानाभ्यांचतुर्थ्येतमेनत्।ताभ्यांबलमा[illegible]भरं
तीआहरंतीप्रियादेवानां।एवंभूतेयंमेखलासुभगा।।ऋतस्यगोप्त्रीतपसःपरस्वीघ्नतीरक्षःसहमाना
अरातीः।।सानःसमंतमनुपरेहिभद्रयाभर्तारस्तेमेखलेमारिषाम।।ऋतस्यगोप्त्रीसत्यस्ययज्ञस्य
वागोप्त्रीतपसःपरस्वीपालेतरतएकूपंपरःशत्रुः।प्रकर्षतपसःप्रकर्षेणपात्री।घ्नतीरक्षःरक्षसांहननंकु
र्वतीसहमानाअभिभवंतीअरातीः।शत्रूजाती।छंदसाऽत्रप्रकृतिभावः।।एवंभूतासात्वंनोअ
स्मान्समंतंसर्वतःअनुआनुपूर्व्येणपरेहिपरिगच्छभद्रयात्वयारक्षितावयं।हेमेखलेमारिषामममा
हिंसी।।तामाहहभर्तारस्तेत्वांबिभ्राणा।।१।।अथानुप्रवचनीयपद्धतिः।।यस्यमंत्रप्रवचनायार्थेन
कृतंतमनुतदंगत्वेष्टयत्कर्मक्रियतेतदनुप्रवचनीयं।।अत्रसावित्र्यनुक्ता।प्राणानायम्यसंकल्प्यउप

नयनांगमनुप्रवचनीयहोमं कर्त्तुं तदंगमन्वाधानं। इत्याघारांतमुक्त्वा सदसस्पतिं सविता रं ऋषिं प्रताः प्रधा
नदेवताः चरुद्रव्येण स्विष्टकृतमित्याद्रिव्याहृत्यंतोक्त्वा समिद्द्वयमाधाय परिसमूहनादि पूर्णपात्रनिधा
नांतं कृत्वा अनुप्रवचनीयार्थं याचितं तण्डुलान्निरुप्य तूष्णीं प्रोक्ष्याघाराघारादि चतुश्रपणांतं कृत्वा चार्याय स्थाली
पाकः श्रृत इति निवेदयेत्॥ एतदंतं कर्म कर्तुं असामर्थ्ये आचार्यो वा कुर्यात्। अथाचार्यो माणवकेन सन्वा
१८ रब्धः इध्माना घाघारांतं कृत्वा। सदसस्पतिमित्यृचा सदसस्पतये। तत्सवितुर्वरेण्यमित्यृचा सावित्र्याः स
वित्र इति मंत्रेण। ऋषिभ्यः चरुं हुत्वा स्विष्टकृदादि होमशेषं समाप्यान्येन ब्राह्मणौदनेन ब्राह्मणान् भोजयित्वा
वेदसमाप्तिं स्वस्ति वाचयीत॥ ॥ अत ऊर्ध्वं त्रिरात्रं द्वादशरात्रं संवत्सरं वा व्रतं चरेत्। एतावदादि स्नानं ॥१८॥
त्रीकालं संध्योपास्त्यग्निकार्यं भिक्षाचरुपास्तिगुरुशुश्रूषादि कुर्यात्॥ प्रियं सोम इति मेधाजननप्रयोगः॥ ॥८५
अत्रत्य मंत्रार्थः॥ चरुहोमे। सदसस्पतिमित्यस्याः कण्वो मेधातिथिः सदसस्पतिर्गायत्री॥ सदसस्पतिमद्भुतं
प्रियमिंद्रस्य काम्यं॥ सनिं मेधामयासिषं॥ मेधां लब्धुं सदसस्पतिं एतन्नामकं देवं अदासिषं प्राप्तवानस्मि
कीदृशं अद्भुतं आश्चर्यकरं प्रियं इंद्रस्य प्रियं सोमपानसहचारित्वात् काम्यं कमनीयं। सनिं धनस्य
दातारं॥ मेधाजननप्रयोगः। त्रिरात्रादिव्रतचर्यानंतरं ब्रह्मचारिणे मेधाजननं कर्म भवति। चतुर्थे
ह्नि आग्नेयी दक्षिणा निर्ऋति दिशोऽन्यस्यां दिशि श्वापरहितं सच्चारवं वापालाशवृक्षं गत्वा त

दर्भाभावे कुशस्तंबं गत्वा तमभ्यर्च्य त्रिः प्रदक्षिणं भ्रमः कुंभेन जलमुक्षन्तं बटुमावाचयेः ॥ ॐ सुश्रवः सुश्रवा इति मंत्रं वा
चयेत् ॥ ततो मेखलादीनि तत्रैव न्युदस्य नवानि धारयेत् ॥ उपाकरणपर्यंतं सावित्र्या ब्रह्मयज्ञं कुर्यात् ॥ तत्कालं सा
वित्री व्रतं उच्यते ॥ ॥ अत्रत्य मंत्रार्थः ॥ सुश्रवः सुश्रवा असि यथात्वं सुश्रवः सुश्रवा अस्येवं मां [redacted] सुश्रवः
18 सुश्रव सं कुरु ॥ यथात्वं देवानां यज्ञस्य निधिपा स्येव महं मनुष्याणां वेदस्य निधिपो भूयासमिति ॥ सुश्रवः सुश्र
वाः पलाशः स्तुतेहि देवानां वै ब्रह्म भवन नेन तस्यर्णे उपासनात् । सुश्रवेनामैतस्यामंत्रणं हे सुश्रवः पालाशत्वं
सुश्रवा असि सुष्टु श्रोता असि । यथात्वमित्यादि पुनर्वचनमादरार्थं । यथा येन प्रकारेण त्वं सुश्रवा असि एवं
मां सुश्रव सं सुश्रोतारं कुरु ॥ यथात्वं देवानां यज्ञनिधिपा सि यज्ञनिधान रक्षकोसि यज्ञे एव हि देवानां विधिः ।
तं पालयसि पाय निरद्धादि रूपेण । अहमपि वपरिचर्यया । एवं मनुष्याणां मनुष्य राहुं नवे दाधिकारिणा
रब्रह्मण उक्ते उच्यते । तेषां वेदस्य निधिपो भूयासं ॥ वेदनिरक्षको भवेयं ब्रह्मणाहि वेदो निधिः । तथा स्मृते ॥
साहि श्रीरमतां सनामिति । हद्धादि रूपेण । अहमपि वपरिचर्यया तपस्ताद्येत्यादि स्मृतयः ॥ अथ महाना
म्नी ॥ उपनीतस्य वेदाध्ययनस्य निसर्गात् तस्याध्ययनस्य उपकरणपूर्वकत्वाद्वक्ष्यमाण प्रकारेण श्रा
वण्यामुपाकृत्य शुभेहनि गुरुमुखामुपक्रम्य वेदाध्ययनं कुर्यात् ॥ तत्र संहितामुपक्रम्य ब्राह्मणं पठेत्त
तावत्कालं एकवेव व्रतं ब्रह्मचारिणो वेदव्रतमित्युच्यते । ततो महानाम्नी व्रतं । तन्त उपनिषद्व्रतं । महाना

म्न्यादीनां त्रयाणां देवव्रतत्वे विद्यमानेपि महानाम्न्यादि विशेषसंज्ञा तत्तदारण्यक भाष्यमध्ययन प्रयुक्ता अतस्तेषां
तथा व्यवहारः महानाम्न्याख्या। विदामघवन्नित्यादि गानवर्ज्यो यद्वा उच्यते। तन्महानाम्नीव्रतं। उदगयनापू
र्के शुभे दिने प्राप्ते पूर्वेद्युः स्वस्तिवाचनं नान्दीश्राद्धं विधाय अपरेद्युः राचार्यः कुशली कृतशिरस्संस्नानं
19 ब्रह्मचारिणां दक्षिणतउपवेश्य उपलेपादि कृत्वा लौकिकाग्निं प्रतिष्ठाप्य प्राणानायम्य संकल्प्यान्वाधानं
कुर्यात्॥ ॥अथ तस्य मंत्रार्थाः॥ अग्नाविग्निश्चरति प्रविष्टः ऋषीणां पुत्रो राजन्यषः॥ तस्मै जुहोमि हविषा घृते
न मा देवानां मामुहद्भागधेयं मो अस्माकं मामुहद्भागधेयं स्वाहा॥ अग्नौ आहवनीये प्रविष्टः मथितत्वा
त तत्र प्रहृतो यमग्निः। चरति चरतु भक्षयतु। आज्यादिकं चरते लिट्। ऋषीणां पुत्रः ऋषयो ज्ञातारः ऋ
त्विजः। ऋषंतीति ऋषयः युगपधास्किः। वृषादिदृष्टव्यः। तेषां पुत्रः ऋषयो हि रत्नं जनयंति। अधिराजा ए ॥५५॥
षः अधिकं राजतीत्यधिराजः। पवाघवृायद्वा अध्यारूढो राजा अधिराजः। दीप्तिवतामुत्तमः। तस्मै घृ
तेन हविषा जुहोमि तृतीयावहो छंदसीत्यस्य यत्र कर्मणि तृतीया। हविर्घृतं जुहोमीत्याहुतयः सः
देवानां भागधेयं भागरूपानाम भ्यो धेय इति स्वार्थे धेयप्रत्यय। मा मोहमुहन्। माविमिसितो भवतु॥
यथाभागं देवेभ्यो हविर्ददाति इत्यर्थः॥ थास्माकं यागपालरूपं भागधेयं मा मोमुहत्॥ यानि रक्षि
निपद्यते हविर्धाणी इति तां त्वा घृतस्य स्वधारया यज्ञं संराधमहे स्वाहा॥ इति संरधनानाम देवता

सावभूरित्येके। मध्यमस्थानावागित्यन्ये। यातिरश्मीति येगच्छन्तासति निपद्यते। चातेकया बुध्या अ
हं सर्वस्य विधरणी विधारयित्रीत्यनया बुध्वा कूपक्षे तु विधरणं होमविघ्नकारिणां निवारयित्रीत्यनया
बुध्या तेषामप्रवेशाश्रयी द्वारदेशाति येगच्छन्ता चैते तां सरोधनी त्वात्वां घृतस्य धारया यजे स्वाहा स्वा
19 हुतमस्तु॥ ॥यस्मै त्वा कामकामय वयं सम्राड् जुहाम हे तमस्मभ्यं काममं वत्वाथेदं त्वं घृतं पिब स्वा
हेति॥ हकामकामि तपात्लकप्रदत्वात्कामनामसम्राट् सम्यक् राजतीति सम्राट् दीप्तिमान् अ
निवयं यस्मै कामायत्वां त्वां यजाम हे त्वामुद्दिश्य यागं कुर्मः॥ अतं अस्मभ्यं तं काममं दत्वा अथेदं घृतं
पिब। स्वाहा स्वाहुतमस्तु॥ अयं नो अग्निर्वरिवः कृणोत्वयं व[illegible]धः पुर एतु प्रभिंदन्॥ अयं वा
ज्ञञ्जयतु पार्हिषाणो यं वाजं जयतु वाजसातौ स्वाहेति॥ अयमग्निः नः वरिवः अभीष्टानि धाना
नि कृणोतु ददातु। कृविहिंसाकरणयोः॥ धिन्वि कृण्व्य रवितिउ प्रत्ययः किंच मृधः। संग्रामान् प्रभिं
दन् प्रकर्षेण विनाशयन् पुरोग्रतएव गच्छतु। ततः स्वस्त्ययमग्निः अस्माकं शत्रून् जयतु जहृषा
णः जयन् मर्त्यां हृष्टांतः करणः हृषे द्रुगतव्यत्ययेनात्मनेपदं। अभ्यस्तानामादिरित्यद्दातत्वं। किंवा।
अयमग्निर्विजमन्नं जयतु। अस्मदर्थमात्मवशं करोतु कृवाजसातौ। इति पूर्त्यादिना निपातान्।

सातेरकर्मणि क्तिन् । जनस्य वनेभ्यालं वाजो लभ्यते यस्मिन् । अस्मिन्नाजार्थे संग्रामे अयं जयतु ॥ आत्यो
पस्थाने ॥ त्वं व्रतानां व्रतपतिरसि व्रतं चरिष्यामि तच्छकेयं तेन राध्यासं । हे अग्ने त्वं व्र
तानां सर्वेषां संबंधी व्रतपतिरसि न पुनरेकस्य व्रतपतीत्वात् व्रतपतिरुच्यसे । समासे संख्याविशे
20 षस्याप्रतिपत्तेः बहुच प्रतिपादनाय व्रतानामित्युक्तं । नित्यसंबंधादिति षष्ठ्यर्थः । वृत्तिस्वरूपता । परिपा
लयिता स्वामी वा । व्रतं निवर्तो भोजने च वर्तते । अत्र नियतिरभिप्रतानि वर्यानि च अनृतवचनस्य प्रग
मनादि वारयतीति व्रतं । तस्य पाता पालयिता व्रतपतिः हे अग्ने व्रतपति पूर्वोक्तस्य नियतिकर्मणः पतेव्र
तं पूर्वोक्तं नियतिकर्म अहं चरिष्यामि तत् । तत्प्रसादात् तच्छकेयं तच्चरितुं शक्तो भूयासं । तेन शकेयं
कर्म कर्तुं गृहीतनियमात् तेन च राध्यासं । सम्यक् चरितेन व्रतेन कर्मणा यत्फलं तत्साधितं त्वत्प्रसादात् ॥२०॥
द्भिः यज्ञपात्रं प्रपश्यामि ॥ आदित्यावेक्षणे । मित्रस्य त्वा चक्षुषा प्रतीक्षे इति । मित्रस्य मित्रभूतस्य सर्वज त
गद्बंधोरादित्यस्य चक्षुषा त्वदीयेनेत्यर्थः । त्वां आदित्यं प्रतीक्षे अभिमुख्येन ईक्षे नास्मदीयेन ॥ मित्रस्य
त्वा चक्षुषा समीक्षे । सम्यगीक्ष्ये शिष्टव्याख्याता ॥ संभारादिगीक्षणे । मित्रस्य त्वा चक्षुषानुवीक्ष्य इति । हे दिशाः
ससंभाराः वो युष्मान् अनुवीक्षे । आदित्यानंतरं वीक्षे ॥ पुनः आदित्यवीक्षणे । मित्रस्य त्वा चक्षुषा प्रति
पश्यामि यो अस्मान् द्वेष्टि यं च वयं द्विष्मः तं चक्षुषा हंतुमत्र विधिरिति । हे आदित्य मित्रस्य चक्षु

पाला प्रतिपश्यामि पुनरपि पश्याम यियो अस्मान्द्वेष्टि यस्यास्माकं अप्रियो ऽस्ति वयं च यं द्विष्मः अप्रिया
स्मात द्वेषिणं व[illegible] श्रूषो वासस्येति शेषः। हेतुकः सुतु प्राप्नोतु॥ ॥भूम्यूपस्पर्शने। अग्न इन्द्र स्थान मद्द्रष्टा
नम ऋषिभ्यो नमो नमो वो अस्तु देवेभ्यः। शिवा नः शंतमा भव सुमृडीका सरस्वती मा ते व्योम संदृशीति। हे
20 अग्ने द्रष्टा ऋषिभिः त्वदीयेति शेषः। त्वदधिष्ठाना॥ अयमर्थः। सूर्यो नो दिवस्पात्विति मंत्रे प्रतिपादितः॥
अग्निरेव पृथिव्यां संजायते तत्र च नमः इन्द्राइ द्रष्टाभ्य ऋषिभिः नमः अनंतकारणत्वात्। अनपरता [illegible] दू
रैयेनमः। इन्द्र स्यन्तरस्य संबंधः मंत्ररूढः मंत्रस्पृग्भ्यः। ऋषिभ्यो नमः। मंत्रपतिभ्यः मंत्रपालकेभ्यो
देवेभ्यश्च वो युष्माकं नमः अस्तु पुनरपि भुवं प्रार्थयते शिवा यैन इत्यादिना। नः शिवा शंतमा शंत
माभर। तथा सुमृडीका सुष्टु सुखयित्री यद्वा शोभनामृडीकाः सुखयितारो वंय वा यस्याः सरस्वतीति स
रइस्य दकनाम तद्वती रुदकं तरकत्वात्॥ तादृशी त्वमसि बुद्ध्या दस्सः सकारः तादृश्यास्तव व्योम छिद्रं मा
संदृशि ओषध्यादिभिः छन्नत्वात्। क्षेवलोककाशो मा दृशीति एतद्धि पृथिव्याः प्रियतरं साकाय तौष
धीभिर्वनस्पतिभिः प्रजायये तिदर्शनात्। दृशोर्लिटि च्चिणि विध्यर्थभावः॥ इच्छांदसः। यद्वा तव संदृशि सं
दर्शे वर्त्तमानानाम रकाकं व्योमश्शून्यतामस्तु। यद्वामरणं त्वष्टि वा विविधं नक्षणं व्योम तद्दत्वत्प्रसा
दान्मा विगमत्। अपितु संगच्छतीमिति शेषः॥ ॥भद्रं कर्णेभिरित्यस्याः राहुगणो गोतमो विश्वे देवा

स्त्वष्टु ॥ भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं य
दायुः ॥ हे देवाः दानादिगुणयुक्ताः सर्वे देवाः कर्णेभिः अस्मदीयैः श्रोत्रैः भद्रं भजनीयं कल्याणं वचनं श्रृणुयाम
युष्मत्प्रसादाच्छ्रोतुं समर्था स्याम । अस्माकं बाधिर्यं कदाचिदपि मा भूत् ॥ हे यजत्राः यागेषु यपुरोडाशा
दिभिः आत्मीयैश्चक्षुभिः भद्रं शोभनं रूपं द्रष्टुं समर्थाः स्याम । अस्माकं दृष्टिप्रतिघातोपि मा भूत् ॥ स्थिरैरं
गैः दृढैर्हस्तपादाद्यवयवैः । तनूभिः शरीरैश्च युक्ता वयं तुष्टुवांसः ॥ युष्मान्स्तुवंतो यदायुः षोडशाधिकशत
प्रमाणं विंशत्याधिकशतप्रमाणं वा । देवहितं देवेन प्रजापतिना स्थापितं तद्व्यशेम प्राप्नुयाम कर्णेभिः
बकुरुत्वंछ दसीति भिः स ऐस्त्वः । अक्षिभिः छंदस्यपि दृश्यते । इत्यनङ् ॥ ॥ शंन इंद्राग्नी त्यस्या मैत्रा
वरुणिर्वसिष्ठो देवास्त्वष्टु ॥ शंन इंद्राग्नी भवतामवोभिः शंन इंद्रावरुणा रातहव्या । शमिंद्रासोमा ॥२१॥
सुविताय शंयोः शंन [redacted] इंद्रापूषणा वाजसातौ ॥ नो अस्माकं अस्मभ्यं वा इंद्राग्नी अवोभिः रक्ष
णैः शं शांत्यै भवतां । इंद्रासोमावपि नः शं शांत्यै सुविता कल्याणाय च भवतां । शं शांत्यै शं योः सुखा
य च पुनरुक्तिरादरार्थे । अथवा शं शमनहेतुकं सुखं योगनिमित्तं सुखं इत्यपुनरुक्तिः । त
स्मै भवतां इंद्रापूषणा वापि वाजसातौ अस्तु हे अन्नलाभनिमित्ते च नः शं शांत्यै भवतमित्यर्थः ॥

॥ स्तुषे जनं सुव्रतमित्यस्याः बार्हस्पत्यो भरद्वाजो विश्वे देवास्त्रिष्टुप्। स्तुषे जनं सुव्रतं नव्यसीभिर्गीर्भिर्मि
त्रावरुणा सुम्नयंता॥ त आ गमंतु त इह श्रुवंतु सुक्षत्रासो वरुणो मित्रो अग्निः॥ ॥ स्तुषे जनमिति सु
व्रतं सुकर्माणं जनं दैव्यं जनं देवसंघं नव्यसीभिर्नवतराभिर्गीर्भिः श्रणोतिभिः स्तुषे अहं स्तवे॥ तथा
मित्रावरुणौ मित्रः प्रमीतेस्त्रायकः वरुणः पापान्निवारयता। एतावपि देवौ स्तौमि कीदृशौ सुम्न
यंता सुम्नं सुखं स्तोतृणामिच्छंतौ सुक्षत्रासः ते वरुणादयः॥ सर्वे देवाः इह अस्मिन् यज्ञे आगम
तु आगच्छंतु। ततो इत्याच्छ्रुवंतु अस्मदीयाः स्तुतीः श्रुण्वंतु वा तत्र मित्रादीनां परिगणनं सूपलक्षणं। सूक्त
स्य सर्वे देवताः प्रतिपादकत्वात्। अत एवं पूर्वं जनमिति सामान्यनिर्देशः॥ ॥ कया नश्चित्र ऽ आभु
वद्दूती सदावृधः सखा॥ कयाशविष्ठया वृता॥ कया न इति तिसृणां गोतमो वामदेव इंद्रो गायत्री॥ अभी
षणा इति पादनिवृत्। सदावृधः सदावर्धमानः॥ [illegible] चित्रः चायनीयः सखा मित्रभूत इंद्रः कया ऊत्या
तर्पणेनो अस्माना भुवत्। अभिमुख्येन भवेत्। शविष्ठया प्रज्ञावत्तमया प्रज्ञया अहि मनुष्टीय मा
नेन कयावृता केन वर्तमानेन कर्मणा च अभिमुख्यो भवेत्॥ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदं
धसः॥ दृळ्हा चिदारुजे वसु॥ मंहिष्ठः पूजनीयः सत्यः सत्यभूतः मदानां मादयितॄणां मध्ये को

मदकरः अंधसा सोमस्य रसः। हे इन्द्राय पिव सुवसूनि शत्रूणां धनानि आरुजे॥ आसमंताद्भुक्तो हे
इंद्र त्वां मत्सत मादयेत्॥ ॥ अभीषुणः सखीनामविता जरितॄणां॥ शतं भवास्यूतिभिः॥ हे इं
द्र त्वं सखीनां जरितॄणां अविता रक्षिता। त्वं शतं शतेन बहुभिः ऊतिभिः सह नो अस्माकं तु ष्टु अभी
२२ सि अस्ति मुख्यो भव॥ ॥ स्योना पृथिवीत्यस्याः कण्वो मेधातिथिः पृथिवी गायत्री॥ स्योना पृ
थिवी भवानृक्षरा निवेशिनी॥ यच्छा नः शर्म सप्रथः॥ हे पृथिवी स्योना त्वादिगुणसंयुक्ता सुख
स्योनशब्दो बोधि स्तीर्णवाची। तथा च वाजसनेयब्राह्मणे स्योनशब्दोपेतं कंचिन्मन्त्रमुदाहृत्य व्या
र ख्यातं इदं स्योनं भा विशेति स्योनमिति विस्तीर्णं विस्तीर्णमित्येवैतदाहेति। यद्वा स्योनशब्दः सुख
वाची॥ अनृक्षरा कंटकरहिता निवेशनी निवासनेहचनभूता सप्रथः विस्तारयुक्तं शर्म २२॥
शरणं नो अस्मभ्यं यच्छ हे पृथिवी देहि। अतिश्रवणे महानाम्नीऋचो व्याख्यास्यामः॥ ॥
अथ महाव्रतप्रयोग उच्यते॥ उपनिषदिति एष पंथा इत्यारण्यककांडं तत्र मंत्रा उक्थं ते। तत्र उ
पनिषद्व्रतं। पूर्ववदुदगयनाद्युक्ते काले स्वस्तिवाचनं नांदीश्राद्धं विधाय पाडपरेद्युः आचा
र्यः महाव्रतवत् ब्रह्मचारिणः वापनादि परिदानांतं होमं तत्र समाप्य नवमोजीदंडो ते दत्वा

स्विष्टकृतादिहोमशेषं समाप्य संवत्सरमेत द्व्रतं चरेति मंत्रा व्याख्याताः॥ ॥अथ गोदानिकं॥ गोदाननिमित्तिक
मेन्नामधेयं॥ गोदाननिमित्तिश्रोत्रयोरुपरिदेशं तेन तद्वपनं लक्ष्यते॥ यद्वा गावो लोमानि केशाव मोखगबाललोमस्थि
तितेषां वपनं॥ इदं षोडशवर्षे कार्यं चौलवत्॥ इति गोदानिकं॥ अत्र ये मंत्राश्चौले व्याख्याताः॥ अथ समावर्त्तनं॥
समावर्त्तनं निमित्ति गुरुकुलान्निवृत्तिः॥ इदं कर्मविधाने कर्त्तव्यं॥ ग्रामाद्बहिरीशान्यां दिशि गुरुं चापन्नां संपूजयेत्॥
22
चौलवत्सर्वं कुर्यात्॥ मंत्राश्च कृते विज्ञोले व्याख्याताः॥ विशेषस्तु त्रायस्व नं अस्मिन् अर्थे त्रायस्व मामिति व्या
ख्येयं॥ विशेषस्तु॥ युवं वस्त्राणीति अस्याः औचथ्यो दीर्घतमा मित्रावरुणौ त्रिष्टुप्॥ युवं वस्त्राणि पीवसा वसा
ते युवोरछिद्रा मंतवो ह सर्गाः॥ अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे॥ युवं युवां पीवसा
मीवा न्यछिन्नानि वस्त्राणि आछादनायोग्यानि वासांसि वसाथे आछादयेत्यर्थः॥ यद्वा पीवसा स्थूलेन
प्रभूतेन तेजसा वस्त्राणि दधाथे। अविछिन्नानि वस्त्रस्थानि॥ यानि तेजांसि धारयेत्यर्थः॥ किं च॥ युवो
युवयोः सर्गः सृष्टय। आछिद्राः अछिन्नानि नामतयो मननीयाश्चादिदृशो युवं विनिसवौ एवन्नतानि अ
सत्यानि। बाधियानि पापानि अवातिरतं नाशयत संहितायां ऋसकः इति प्रकृतिभावादा खलं वां ऋते
न पापेन तत्साधनेन यज्ञेन वा। सचेथे संगछथ॥ अस्मभ्यं योजयेत्यर्थः॥ ॥छ॥ ॥अंजनधारणे॥ अश्मन
स्तेजोसि चक्षुर्मे पाहि॥ हे जनत्वं अश्मनः धातुरूपस्य पाषाणे तेजः आरासित्वसंनिधानात् मे चक्षुः

पाहि रक्ष॥ कुंडलधारणे॥ अश्मनस्तेजोसि श्रोत्रं मे पाहि॥ हे कुंडल त्वं अश्मनो धातुरूपस्य पाषाणस्य तेजः सा
रोहि अश्मरत्नं तेखचितत्वात् तत्तेजस्त्वं मे श्रोत्रं पाहि। भूषयेत्यर्थः॥ ॥स्रग्धारणे। अनार्तस्यनार्तो हं भू
यासं। हे स्रक् त्वं अनार्त्तोसि अदुःखितासुखसाधनत्वात्। सुखरूपासीत्यर्थः॥ अजिनधारणे। अ
23 अतस्त्वद्धारणात् अहमपि अनार्त्तः सुखी भूयासं॥ उपानहावास्थाने। देवानां प्रतिष्ठस्थः सर्वतो मा
पाहि पात। हे उपानहौ युवां देवानां द्योतमानानां प्रतिष्ठस्थः। प्रस्थानसाधने भवथः। युवयो राक्र
मणेन मा मां सर्वतः कंटकादिभ्यः पात रक्षतं॥ ॥छत्रधारणे॥ दिवः छद्मासि। हे छत्र त्वं दिवः आ
काशस्य छद्मासि छादनमसि। ततः पात आतपं निवारयेत्यर्थः॥ दंडधारणे। वेणुरसि वनस्पत्योसि स
र्वतो मां पाहि॥ हे दंड त्वं वेणुरसि वेणुरूपोसि वानस्पत्योसि वनस्पतिसंबंधोसि सर्वतो गोसर्पादिभ्यो ॥२२॥
मा मां पाहि रक्ष॥ कंठमाल्याधारणे॥ आयुष्यं वर्चस्यं रायस्पोषमौद्भिदं॥ इदं हिरण्यं वर्चस्वज्जैत्राया
विशतादिमां॥ आयुषो निमित्तं रायस्पोषं रायो धनस्य पोषं पुष्टिहेतुं। सर्वस्य धनस्य हिरण्यमूलत्वात्।
ओद्भिदं उद्भिद्य जायते। उद्भिदमेव औद्भिदं। इदं हिरण्यं। वर्चस्वाति। वर्चसि तेजसि। जैत्र्यं यज्जयहेतु
जैत्र्यं कर्म तस्मै जयायेव वा इमां तनुमाविशतात्। आविशतु अलंकरोत्यर्थः॥ ॥उच्चैर्वादि पृतना
षाहं सभासाहं धनंजयं॥ सर्वाः समग्राः ऋद्धयो हिरण्ये अस्मिन् समाहिताः॥ उच्चैर्वादी जयति इति उच्चैर्वादी

जिहिरण्यवंतो उच्चैर्वदति। पृतनाषाट् पृतनां सहते अभिभवतीति पृतनाषाट्। सभासाहं सभां सहते अ-
भिभवति वशीकरोतीति सभासाहं। धनंजयं शत्रुसंबंधिनो धनस्य जेतारं। सर्वाः समस्ताः समग्राः संपूर्णा
ऋद्धयः अस्मिन् हिरण्ये समाहिताः॥ ॥शुनमहं हिरण्यस्य पितुर्नामेव जग्रभ॥ तेन मां सूर्यत्वचम
करं पूरुषप्रियं॥ शुनमिति सुखनाम। सुखकरं हिरण्यनाम। अहं जग्रभ। उच्चारयामि जग्रभेति हकार
स्य भकारः। छांदसः। पितुर्नामेव यथा पुत्रः पितुर्नाम पुनः पुनः कीर्त्तयति। तद्वत्। हे हिरण्य तेन त्वयि
इमं सूर्यत्वचं सूर्यवद्दीप्तचर्म तथा पुरुषं मनुष्येषु यमकरं हिरण्यधारणात् हि पुमान् दीप्यते लोकप्रि
यश्च भवति॥ ॥संम्राजं च विराजं चाभिष्टिर्या च मे ध्रुवा॥ लक्ष्मीराष्ट्रस्य या मुखे तया मामिंद्र सं
सृज॥ हे इंद्र आभिषिष्टिः अभिषिक्ता या लक्ष्मीर्मे ध्रुवा। या च लक्ष्मी राष्ट्रस्य मुखे मुख्यस्थाने तिष्ठ
ति संम्राजं सम्यक् दीप्यमानं विविधं दीप्यमानं मां तया लक्ष्म्या संसृज। संयोजय॥ ॥अग्नेः प्रजातं प
रि यद्धिरण्यं अमृतं संम्रे अधि मर्त्येषु॥ य एतद्वेद स इहिदेनं दहतीति ज[illegible]रा मृत्युर्भवति यो बिभर्ति॥ यद्धि
रण्यं अग्नेः सकाशात् प्रजातं हिरण्यरेतत्वात् तद्धिरण्यं मनुष्येषु अमृतं अनश्वरं। अधि जज्ञे। एतत्
पुमान् एतत् इदं हिरण्यं इदं यामिति वेद। अमृतं हिरण्यमिति स्थितः॥ स इदं सर्वं एतद् दहति॥ एत
त्प्राप्तुमर्हति। किं च। यो बिभर्ति कुंडलाद्याभरणभूषणः स जरा मृत्युर्भवति। जरया नाशको भवति॥

अत्वकरवान्पुरुषः॥जराक्रांतोपिलोकेयुवेवभातीत्यर्थः॥ ॥यद्वदराजावरुणोपदुदेवीसरस्वती॥इंद्रोयद्वृत्रहा
वेदतन्मेवर्च्चसआयुषे॥वरुणोरायेयद्धिरण्यंवेदसरस्वतीदेवीयद्वदव्रत्रहेंद्रोयद्वस्त्रउपलक्षणमेतत्॥सर्वदे
वेषुप्रसिद्धमित्यर्थः॥नतद्रक्षांसिनपिशाचाश्चरंतिदेवानामोजःप्रथमजंह्येतत्॥योबिभर्त्तिदाक्षायणं
२५ हिरण्यंसदेवेषुकृणुतेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः॥रक्षांसिपिशाचाःतद्धिरण्यंप्रतिनचरंति।
तद्धिरण्यंदेवानांप्रथममोजोहिदाक्षायणंदाक्षायणीगौरीयत्संबंधंदाक्षायणंतपाप्रथमंधृतवान्त्वाएता
दृशंहिरण्यंयोबिभर्त्तिसदेवेषुमध्येदीर्घमायुः।कृणुतेसएवमनुष्येषुदीर्घमायुःकृणुतेआत्मनइति
शेषः॥आयुष्यमितिपूर्वस्याम्रविडक्तत्वात्॥ ॥यदाबध्नंदाक्षायणाहिरण्यंशतानीकायसुमनस्य
माना॥तन्मआबध्नामिशतशारदायायुष्मान्जरदष्टिर्यथासत्॥दाक्षायणादक्षपुत्रीगौरीतितत्रस्था
नेव्यत्ययेनयष्ट।कीदृशीषुसुमनस्यमाना।सौमनस्ययुक्तासती।शतानीकायस्यशतमंपरिमितं। ॥२७॥
अनीकंदक्षाद्यैःसहयुद्धंयस्यसः॥शिवःअतएवश्रीरुद्रेसत्स्यशतेषुयुद्धमितिबाहयोस्तवहेतयःइति
युद्धसाधनानांयुक्तात्वात्तस्मैशतानीकायतदर्थंतत्प्रियार्थंयद्धिरण्यंमाबध्नान्।आसमंताद्बध्ना
तितद्धिरण्यंमेममशतशारदायशतंशारदंजीवनायआबध्नामिअलंकारत्वेनधारयामि॥यथाएत
द्धारणेनआयुष्मान्जरदष्टिःजीर्णोशानश्चआसन्।असंछेटिव्यत्ययेनप्रथमपुरुषः॥ ॥घृता

दुर्लभं स्वं मधुमत्सुवर्णं धनंजयं धरुणं धारयिष्णु ॥ ऋणक् सपत्नादधरांश्च कृण्वदारोह मां महते सौभगा
य ॥ घृताद्दुरः घृतादपि मधुरं । तस्य हिरण्यं लक्ष्म्या त्वाभासितं लोकभावने । इत्यस्माकं प्रत्ययः । यः मधुम
त्सु माधुर्योपेतं धरुणं धारकं प्रस्य धारयिष्णु जगधारणशीलं । सुवर्णं शोभनवर्णं एवंभूतं । हे हिरण्मयं दि
२५ रण्य त्वं सपत्नान् शत्रून् ऋणन् रुंधन् । अधरांश्च कृण्वन् न्यक्कृतांश्च कृण्वन् कुर्वन् महते सौभगाय सौभा
ग्याय मामारोह । मयि स्थिरं भवेदित्यर्थः ॥ ॥ प्रियं मा कुरु देवेषु प्रियं राजसु मा कुरु ॥ प्रियं विश्वेषु गोत्रे
षु मयि धेहि [illegible] वारुचं ॥ हे हिरण्य मां देवेषु मध्ये त्वा हारण दानाद्वा प्रियं कुरु । स्वत्र हपात्रं प्रियः जनानां दा
तेवेतिवनात् । तथा राजसु राज्ञां मध्ये प्रियं कुरु । विश्वेषु गोत्रेषु अस्मत्संबंधिषु कुलेषु प्रियं कुरु । रुचा र
स भ्रुयार्थे हि । तो तृतीया रुद्ध्रिं भिदं कोस्यर्थद्वि रत्नि राद राथो । मयि धेहि स्थापय । तत्प्रधानमिति शेषः ॥
अर्वाचमिंद्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः ॥ इमं नो यज्ञं विहवे जुषस्वास्य कुर्मो हरिवो मे
दिनं त्वा ॥ अमुतः अमुष्मान्महत्यं मस्थानात् दिवो वा अर्वाचं मत्तिमुखं इंद्रं हवामहे ॥ आह्वयामः ॥
यः गोजित् । गवाउदकादीनां जेता । धनजित् । धनानां अश्वादीनां च यो जेता । स त्वं नो अस्माकं । यज्ञं वि
हवे स्पर्द्धास्थाने संग्रामादौ । जुषस्व सेवयः । अस्मज्जयार्थं । हे हरिवः मरुवसोरिति रुत्वं । अस्य यजमा
नस्य मेदिनं स्नेहवंतं त्वं कुर्मः । तस्मादिममस्य यज्ञं जुषस्व सेवस्व ॥ ॥ उपरि समिधादाने । [illegible]तं व मे

अस्मतं वमेतन्म उभयव्रतं। निदावमेद् इत्यादि द्वादशाप्येवमेवोह्याय थापाठमथोत्तरं॥ यदग्ने सेंद्रस्य
सप्रजापतिकस्य समनुष्यस्य समनुष्यराजन्यस्य साकाशस्य सातीकाशस्य सानूकाशस्य सहार्णवे
स्थपशुतृप्तिः पाप्मा श्वयन्म आत्मे आत्मनि व्रतं तन्मे सर्वव्रतमिदमहमग्ने सर्वव्रतो भवामि स्वाहा॥ हे
अग्ने सेंद्रादिगुणविशिष्टस्य तवाधीनं त्वय्यपि समर्पितं तेनानेन सर्वप्रकारेण व्रतेन संपूर्णः सर्वव्र
२५ तो भवामि॥ अनेन व्रताधिष्ठातृत्वं श्रूयते॥ त्वमग्ने व्रतपा असीत्यग्नेः कीदृशस्याग्ने इंद्रस्येंद्रसहितस्य
उत्तरार्धे दृश सप्रविशेषणानि स्याष्ट्रा नि। मनुष्यराजन्या इतियमः॥ अनेनैंद्रादीनां स्वस्य व्यापा
रेष्वग्न्याधीनत्वं विवक्षितं। पुनः कथंभूतस्याग्नेः साकाशस्य आकाशः अवकाशः तेन सहितस्य
अवकाशाभावे अग्नेः पाठवान्। सातीकाशस्य अतीकाः क्षोगवाक्षः ०पल गृहेषु तत्सवीतस्य सानुका
शस्य अतीतरगवाक्ष सहितस्य सप्रतीकाशस्य प्रतीकाशः सदृशः। आत्मसदृशः। अग्न्यंतरस ॥२५॥
हितस्य आहवनीयादि वृत्तिर्भिद विवक्षणया इदं विशेषणं सदेव मनुष्यस्येत्यादि विशेषणवत्तु
ष्टयं द्वितीयपशुसाहित्यं हे विधिष्ठयाप्रतादृशस्य अग्नेराधीनं मम व्रतमित्यन्वयः॥ समिधादानं॥
ममाग्ने वर्च इति सख्खिलस्य दशार्चस्य सूक्तस्य अंगिरसो विहव्यो विश्वेदेवास्त्रिष्टुप्॥ अंत्या जगती॥
ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेंधानास्तन्वं पुषेम॥ मह्यं नमंतां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृ

तनाजेयम ॥ हे अग्ने विधामा ह्वयंते रषितिविहावाः संग्रामेषु यज्ञेषु वा वर्चो दीप्तिः त्वदनुग्रहात् मम अस्तु । भ
वतु । वयं त्वा महत्वं मदर्थं चतस्रः प्रतिदिशः प्रकृष्टादिशः तद्वासीनो जनाः इत्यर्थः । नमतां च त एव वशंवदी भवंतु त्वया
अस्माभिः हविर्भिः प्रवर्धितेन अध्यक्षेण सुरेण सता पृतनाः जयेम अभिभवेम ॥ ॥ मम देवा विहवे संतु सर्वे इं
द्रवंतो मरुतो विष्णुरग्निः ॥ ममांतरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामे अस्मिन् ॥ सर्वे देवाः विहवे संग्रामे
यज्ञे वा मम संतु मे मे वसाधका भवंतु । के पुनस्ते । इंद्रवंतः इंद्रेण संयुक्ताः मरुतो विष्णुरग्निश्च तथा अंतरिक्षं म
म उरुलोकं विस्तीर्णप्रकाशं मम अस्तु । लोकृ दर्शने इति धातुः । लोकः आलोकः प्रकाश उपलोकोस्येति बहुव्रीहौ पू
र्वपदप्रकृतिस्वरत्वं अपि च अस्मिन् कामे कामितव्ये प्राप्ते निमित्तभूते सति वातो वायुः मह्यं पवतां अनुगुणं
प्रवातु अनुरूपपवनेवादिकः ॥ ॥ मयि देवा द्रविणमायजंतां मयि आशीरस्तु मयि देवहूतिः ॥ दैव्या होतारो वनु
षंत पूर्वे अरिष्टाः स्याम तन्वा सुवीराः ॥ हे देवाः सर्वे द्रविणं धनं मयि स्तोतरि आयजंतां गमयंतु मह्यं ददत्वि
त्यर्थः ॥ आशीरावश्यवर्णीयं यज्ञपाल्कं च मय्येवास्तु हे देवा तां हुतिं ह्वानमस्मिन्निति देवहूतिः यज्ञः सच
यज्ञो अस्तु । अपि च दैव्या नाभिमे दैव्याः देवा यामिति यद्ध ता दैवो होतारः साधु होमनुनिष्पादकाः मदीया ऋ
त्विजः पूर्वे अन्यदीये ऋत्विग्भ्यः प्रथमे भाविनः संतं वनुषंत । देवान् संभजंतां वयं च तन्वा शरीरेण
अरिष्टाः अहिंसिताः अवीराः सुपुत्राश्च स्याम भवेम ॥ ॥ मह्यं यजंतु मम यानि हव्याकूतिः सत्यामे
नसो मे अस्तु । ये नो मा अभिगां कृतं मत्सुना अहं विश्वे देवासो अधि वोचतानः ॥ मह्यमदर्थं यजंतु ऋत्विजो

देवान् हविर्भिः यजन्तु । यद्वा षष्ठ्यर्थे चतुर्थी । मह्यं मदीयाकूतिविजय इत्यर्थः । मम भूतानि यानि हव्या
हवींषि चरुपुरोडाशादीनि वसन्ति तैर्हविर्भिरित्यर्थः । तथा मे मम मनस आकूतिः संकल्पनं अभिलीष्ट
स्यकार्थं नं सत्याः यथार्थो स्तु । अपि च अहं कृतमश्च न किमपि एनः पापं । मानि गां नियत निकृतं रवा
मगम्स्त्वयं पापं मा कार्षमित्यर्थः अपि च हे विश्वे देवाः यदेवाः यूयं नोऽस्माकं मधिवोचत विद्वादिषुप
क्षपातेन ब्रूत ॥ ॥ देवीः षडुर्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वं ॥ मा हास्महि प्रजया मा तनूभि
र्मा रधाम द्विषते सोम राजन् ॥ हे षडुर्वीः षट्संख्याका उर्वीः एताश्चान्यत्राम्नायन्ते षष्मो वीरिति
री द्दरयोर्हवीं द्व्यः उरुभिः स्निणोधन नो अस्मान् य न प्रमत्याविषये वीरयध्वं विक्रामयत यथा ॥२६॥
वयं तल्लभते । लभे महि तथा वीर्यवन्तो यूयं प्रयतत्वमित्यर्थः । वीरयतिः क्रान्तौ ॥ अपि च प्रजाया पु
त्रादिरूपया मा हास्महि वयं मा परित्यज्ये महि मा परित्यज्या हु इत्यर्थः ॥ तथा हे राजन् राजमानय
हास्माकं स्वामिन् । हे सोम द्विषते अप्रियं कुर्वते षष्ठ्यर्थे चतुर्थी द्विषतः शत्रोर्मा रधाम वशं
प्राप्नुयाम तदधीनत्वं कुर्वीत्यर्थः ॥ ॥ अग्ने मन्युं प्रतिनुदन् परेषामदब्धो गोपाः परिपाहि नस्त्वं ॥ प्रत्यञ्चो
यन्तु निगुतः पुनस्तेऽमैषां चित्तं प्रबुधां विनेशत् ॥ हे अग्ने रेषां शत्रूणां मन्युं क्रोधं प्रतिनुदन् प्रति
मुखं प्रेरयन् तिरस्कुर्वन् अदब्धः केनापि अहिंसितः गोपाः गोपायिता रक्षिता त्वं नो अस्मान्

परिपाहि। यपितः सर्वतः सर्वतो रक्षन्ते शत्रवः प्रत्यंचः प्रत्यंचतः प्रतिनिवर्त्तमानाः ॥ निगुतः निगुताद्व्यकेश
द्विः । अवांचं शत्रुं नितरां कुर्वतः पुनर्यंतु स्वकीयं स्थानं पुनर्गच्छंतु अपि च प्रबुद्धा प्रबुध्यमाना वा जनता मेधा
शत्रूणां चित्तं ज्ञानसाधनं मनः अमा सह युगपत् देवा नि विनेशन् । विनश्यन्तु । प्रत्येकाभिप्रायेणैकवचनं ॥
॥ ॥ धातारं धातॄणां भुवनस्य यस्पतिर्देवं त्रातारमभिमातिमातिषाहं ॥ इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पां
तु यजमानं न्यर्थात् ॥ धातॄणां स्रष्टॄणामपि धातारं स्रष्टारं भुवनस्य कृत्स्नस्य भूतजातस्य यदिंद्रः सविता वा पतिः
पालयिता तं देवं देवनशीलं त्रातारं सर्वेभ्यो भयेभ्यः पालयितारं अभिमातीतिषाहं अभिमानीनां शत्रूणां
सोढारमभिभवितारं एवं गुणविशिष्टमिंद्रं सवितारं वा स्तोमि इति शेषः ॥ उभाउ तौ अश्विना अश्विनौ बृह
स्पतिः स्वरतः त्वष्टा प्रमुखाः सर्वे देवाः इमं यज्ञमनुष्ठीयमानं यजमानं च न्यर्थात् निष्टादर्वात् [illegible] पातारं ॥
यद्वा अर्थस्य प्रयोजनस्य भावोन्यर्थः तस्मात् पांतु रक्षंतु सफलं कुर्वंत्वित्यर्थः ॥ ॥ उरुव्यचा नो महिषः शर्म
यंसदस्मिन्हवे पुरुहूतः पुरुक्षुः ॥ स नः प्रजायै हर्यश्व मृळयेन्द्र मानो रीरिषो मा परा दाः ॥ उरुव्यचाः विस्ती
र्णव्यापनः माहिषो महान् पूज्यो वा पुरुहूतः बहुभिर्यजमानैराहूतः पुरु[illegible]हूतः बहुनिवासः । यद्वा
पुरुभिर्बहुभिः सेव्यमानः इंद्र ऋषव इंद्र अस्मिन्हवे य[illegible]ह्वयंते अस्मिन्हवीषि इति । हवो यज्ञः
यद्वा अस्मिन्हवे तद्विषये आह्वाने नो अस्मभ्यं शर्म सुखं यंसत् नियच्छतु । दद्यादित्यर्थः । हे हर्यश्व

हविरश्वोयस्यतादृशहेइंद्रसत्वंनोअस्माकंप्रजायैद्विती यार्थेचतुर्थी।प्रजायांपुत्रपौत्रादिकान्
मृळय सुखय।नोअस्मान्मरिरीषो माहिंसीः माचपरादाः परादानंपरित्यागः मापरित्यागद्
त्यर्थः॥ ॥येनःसपत्नाअपतेभवंत्विंद्राग्निभ्यामवबाधामहेतां॥वसवोरुद्राआदित्याउपरि
27 स्पृशान्मोग्रंचेत्तारमधिराजमक्रन्॥ नोअस्माकंयेनःसपत्नाःशत्रवःतेअपभवंतु स्वस्थाना
दपगताःपलायिताभवंतु।तान्सपत्नान्इंद्राग्निभ्यांहविर्भिस्तोषितैःसन्नोभ्यामनुगृहीतावय
यंअवबाधामहेनिष्टतरंविनाशयामः।अपिच।वसवोरुद्रआदित्यासमामां।उपरिस्पृशंउन्न
तपदस्थंउग्रंचेत्तारं।सर्वेभ्यःश्रेष्ठंअक्रन्कुर्वन्तुउग्रमुत्पृष्टंचेत्तारंसर्वस्यज्ञातारंमधि ॥२७॥
राजंसर्वेषांअधीश्वरंचमाकुर्वंतु॥ ॥इतिसमावर्तनं॥ ॥गुर्वनुज्ञागतस्यविवाहार्थंयातुः
अनाकुलपरिहारार्थं मंत्राः।तेषामर्थः।प्राणापानयोरुभ्यरात्वयाप्रपद्येदेवायसवित्रेपरिददा
मीति।हेसवितः।त्वयानिमित्तभूतेनप्राणापानयोर्विषयेसप्तमीतयोर्विषयेसमुत्पन्नहत्व्ययो
व्यायनेंव्याप्तिर्यस्यसः।प्राणापानयोर्योगस्यविघ्नहेतुत्वात्दीर्घायुष्ट्वानित्यर्थः॥ ॥
तादृशोहंप्रपद्येत्याजपेनोऽस्मिअतएवसवित्रेपरापित्रेदेवायदुभ्यंपरिददामिसमामितिशेषः॥

त्वदधीनं करोस्यर्थः॥ आ मंद्रैरित्यस्या गाथिपुत्रो विश्वामित्र इंद्रो बृहती॥ आ मंद्रैरिंद्र हरिभिर्याहि म
यूररोमभिः॥ मा त्वा के चिन्नियमन्विन्न पाशिनो ति धन्वेव तां इहि॥ हे इंद्र मंद्रैर्मदकृद्भिर्मयूररोमभि
र्मयूररोमश्च दृश्चरो मश्चदृश्चरो मयुक्तैर्हरिभिरश्वैरुपेतास्त्वं मायाभिः हियसंप्रत्यागच्छ। के चिदपि
27 जना त्वा मृगानिव यमन्न मा नियच्छंतु गमन प्रतिबंधं माकुर्वन्नित्यभिप्रायः॥ प्रतिबंधे दृष्टांतः धन्वथा
पाशहस्ता व्याधा विगच्छंति पाशिनो नियच्छंति तद्वन्मां नियच्छंतु किंच। धन्वेन यथा धन्वपाथाः॥ धन्वमरुदेशं
शीघ्रमभिगच्छंति तद्वन्मम न प्रतिबंधकारिणः। स्थानं व्यतीत्य शीघ्रमत्यागच्छ॥ ॥शिष्यान्मंत्रणः॥
महि त्रीणामित्यवस्य सूक्तस्य वारुणिः सत्यधृतिरादित्या गायत्री॥ महि त्रीणामवोस्तु द्युक्ष
मित्रस्यार्यम्णः॥ दुराधर्षं वरुणस्य॥ त्रीणां गत्रयाणां मित्रस्यार्यम्णो वरुणस्य च द्युक्षं दीप्तं अ
त एव दुराधर्षं अन्यैर्धर्षितुं बाधितुमशक्यं महिमत्। अवो रक्षणमस्माकमस्तु। त्रीणामित्यपि बं
दसिद्धत्र्य तद्धाति वचनात्॥ यादेशाभावः॥ ॥नहि तेषाममा च न नाध्वसु वारणेषु॥ ईशे रिपु
रघशंसः॥ अमे ति गृहनाम॥ अमा च न गृहेष्वपि तेषां वरुणमित्रार्यम्णां तदनुगृहीतानां स्तोतॄ
णां॥ वा अघशंसः अघमनर्थमाशंसमानो रिपुः शत्रुर्नहि सेनादिना नाशयितुं हिंसितुमीष्टे तं
तथा अध्वसु मार्गेषु वारणेषु यत्र पुरुषो निवार्यः ते तेषु वरणेषु शत्रुर्निवारयितुं नेष्टे॥ ॥यस्मै

पुत्रासो अदितेः प्रजीवसे मर्त्याय ॥ ज्योतिर्यच्छंत्यजस्रं ॥ अदितेरदीनाया देवमातुः पुत्रा मित्रादयः अस्मै म
र्त्याय मनुष्याय स्तोत्रे अजस्रमविछिन्नं ज्योतिस्तेजो जीवसे जीवितुं प्रयच्छंति तस्य ज्ञातं नैष रः इत्यर्थः ॥ ॥
पक्षिरवाः शाकुंतं जपेत् ॥ कनिक्रदद्विस्यादित्य द्वयोः सूक्तयोः भार्गवः शौनकः कपिंजलपक्षिरूपेंद्रो देव
ता ताः तिस्रः त्रिष्टुभः तिस्रो जगत्यः मध्येति त्राधकर्यष्टिवी ॥ कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरि
तेव नावं ॥ सुमंगलश्च शकुने भवासि मा त्वा काचिदभिभा विश्व्या विदत् ॥ कनिक्रदत् पुनः पुनः
शब्दायमानः ॥ जनुषं जनिष्यमाणमर्थं ब्रुवाणः सूचयन् कपिंजलः अरितेव कर्णधार इव नावं
वाचमियर्ति प्रेरयति ॥ अथ प्रत्यक्षं स्तूयते हे शकुने कपिंजल त्वं सुमंगलः प्रकृष्टः कल्याणश्च भवया
सि ॥ भव ॥ किंच त्वा किंच कापि कल्ल अभिभाः कोप्यातिशत्रवः त्वां विश्व्या विश्वतः सर्वासु दिक्षु मा विदत् मा ॥२९॥
प्रापत् ॥ ॥ मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता ॥ पित्र्यामनु प्रदिशं
कनिक्रदत् सुमंगलो भद्रवादी वदेह ॥ हे शकुने त्वां श्येनः प्रबलः पक्षिविशेषः मोद्वधीत् मा हिं
सीत् ॥ सुपर्णः गरुत्मान् त्वां मोद्वधीत् ॥ तथा इषुमान् बाणवान् अस्ता शराणां क्षेप्ता ॥ धन्वी त्वां
मा विदत् ॥ किंच ॥ पित्र्यां प्रतिदिशं दक्षिणां दिशं अनु दक्षिणस्यां दिशीत्यर्थः ॥ कनिक्रदत् पुनः
पुनः शब्दं कुर्वन् सुमंगलः कल्याणमंगलः भद्रवादी शोभनवादी सन् इह अस्माकं विषये मंगलं वद ॥

सूवय॥ ॥अवक्रंद दक्षिणतो गृहाणां सुमंगलो भद्रवादी शकुंते॥मा नस्तेन ईशत माघशंसो बृह
द्वदेम विदथे सुवीराः॥शकुंते हे कपिंजल त्वं सुमंगलो भद्रवादी च सन् गृहाणां दक्षिणतो दक्षिणस्यां
दिशि अवक्रंद। शब्दं कुरु। दक्षिणतः शब्दायमानः शकुंतो मंगलं सूचयतः हि नोस्माकं स्तेन स्तस्करो मू
षात मेशिष्ट। अघशंसः अनर्थानां शंसः सकोपि मेशिष्ट वयं च सुवीराः। शोभनपुत्रादि सहिताः वि
दद्याये ज्ञेबृहन्मंत्रजातं वदेमोच्चारयाय मः तुष्ट्यामित्यर्थः॥ ॥प्रदक्षिदभिगृणंति कारवो वयो वदं
त ऋतुथा शकुंतयः॥उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानुराजति॥ शकुंतयः कपिंजलाः
ऋतुथ। काले काले। वयोन्नं वदंतः सूचयंतः। कारवः स्तोतारश्च प्रदक्षिणिप्रदक्षिणं अभिगृणंति
अभिवदंतु बहुवचनं पूजार्थं। किं च। उभे वाचो गानं च स्तोभस्त्र॥सामगायत्रं त्रैष्टुभं च सामानी इव च शं
कुंति वदति अनुराजति च।सुगानो अनुरक्तानूकरोतीत्यर्थः॥ ॥उद्गातेव शकुने साम गायसि ब्रह्मपु
त्र इव सवनेषु शंससि॥वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद विश्वतो नः शकुने
पुण्यमा वद॥शकुने हे कपिंजल उद्गातेव साम यथोद्गाता साम गायति तथा त्वं साम गायसि।गानं स
करोषि।वृषेव वाजी सेचन समर्थोश्वः शिशुमतीः वडवाः अपीत्या अभिगत्य शब्दं करोति तथा
पित्यमपि वद शिष्टं स्पष्टं॥ ॥आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः॥

यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ॥ शकुने हे कपिंजल आवदन् शब्दं कुर्वन् त्वं भद्रमा
वद । मंगलं वद तूष्णीमासीनः तूष्णीं तिष्ठन् अपि नोऽस्माकं सुमतिं शोभनमतिं चिकिद्धि । बुध्यस्व ।
यदुत्पतन् वदसि कर्करिर्यथा कर्करीव वदसि । कर्करिः वाद्यविशेषः । सुवीराः शोभनपुत्राः वयं विदथे
यज्ञे बृहत् सूक्तं जातं वदेम उच्चारयेम अनुष्यामिति शेषः ॥ ॥ देवीं वाचमित्यस्याः भार्गवो नेमो वाक्
त्रिष्टुप् ॥ देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ॥ सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वाग
स्मानुप सुष्टुतैतु ॥ यां देवीं देव्यो द्योतमानां मध्यमिकां वाचं देवा माध्यमिका अजनयन्त जनयंति । तां
वाचं विश्वरूपाः सर्वरूपाः व्यक्तवाचोऽव्यक्तवाचश्च पशवो वदंति । तत्पूर्वकत्वात् । कृष्णवर्तेः सा वा ॥२०॥
ग्देवी मंद्रा मदनीया स्तुत्या वर्ष इत्री वृष्टिप्रदानेन नोऽस्मभ्यमिषमन्नमूर्जं पयो घृतादि रूपं र
सं वा दुहाना रक्षंती धेनुर्धेनुर्भूता सुष्टुतास्माभिः स्तुता नास्मानुपैतु प्रगच्छतु ॥ वर्षणाय कृत इत्यर्थः ॥
शिवा देवी प्रियवचने ॥ ॥ स्तुहि श्रुतमित्यस्याः शौनको गृत्समदो रुद्रस्त्रिष्टुप् ॥ स्तुहि श्रुतं गर्त
सदं युवानं मृगं न भीममुपहत्नुमुग्रं ॥ मृडा जरित्रे रुद्र स्तवानो ऽन्यं ते अस्मन्निवपंतु सेनाः ॥
हे स्तोभः श्रुतं प्रख्यातं पुरुहं स्तुहि । कीदृशं गर्तसदं गर्तो रथः तत्सीदंतं । युवानं तरुणं । मृगं न भी
मं मृगं सिंहमिव भयंकरं उपहत्नुं उपेत्य हंतारं शत्रूणां । उग्रमुद्गूर्णं । हे रुद्र त्वमस्माभिः स्तवानः

स्तूयमानः सन् जरित्रे स्तोत्रे मह्यं मृळया सुखयतीति तदीयाः सेना अस्मदन्यं अस्मद्व्यतिरिक्तं पुरुषं
निवपंतु निघ्नंतु ॥ ॥ उल्मुकनिरसने । अन्यं यं मित्रावरुणा महामहा मस्त्वक्षेषां शत्रून् दहंतं स्तो
तादातारं मा ऽजनिष्ठा विशंतु विशो लिंदाना उपयंतु मृत्युं ॥ उल्मुकानपि देवौ हे मित्रावरुणा मित्रावरु
णा मह्यं मम अभयमस्तु युष्मत्प्रसादात् भयराहित्यमस्तु । अक्षिषायुष्मदीयेन तेजसा शत्रून् प्रतीत्याभि
गम्य दहतं भस्मीकुरुतं । मत्तोंतरं युष्मद्दिन्नमन्नः त्रातारं अस्मदादि माहतं मा प्रतिष्ठा विशंतु ॥ अस्म
दीयाः शत्रवः आ तिष्ठां स्थितं मा विशंतु मा प्रविशंतु मा प्रभुवंतु ॥ किं च । मिथो विलिंदाना अन्योन्यं भेद
नं कुर्वंतः संतः मृत्युमुपयंतु प्राप्नुवंतु ॥ ॥ सर्वे लोमयेउस्पन्ने अष्टौ मंत्राः ॥ पृथिवी वृतासाग्नि
ना वृता तया वृतया प्रावृत्या ॥ यस्मा द्भयाद्विभेमि तद्वारये स्वाहा ॥ पृथिवी वृता । वृञ्वरणे वृणोति
ति कृच्चेरि कः । सर्वे व्याप्ते त्यर्थः ॥ एवं वृतासा पृथिवी अग्निना वृता वृञ् संभक्तावि त्यस्मात्
कर्मणि क्तः । संभक्तिः सेवा अग्निना सेविता । अग्नेस्तस्य अधिपतित्वात् तया वृतया अग्न्य
धिष्ठितया वा वृत्या वृणोतीति वृत्ती तया वृत्या निमित्तभूतया यस्माद्भयात् पृथिवी संबंधात् स
यात् बिभेमि भीतिं प्राप्नोमि ॥ तद्भयं अनया आहुत्या तद्भयं निवारयामि स्वाहा ॥ इदं हविः
स्वाहुतमस्तु ॥ ॥ अंतरिक्षं वृतं तद्वायुना वृतं तेन वृतेन वातेन यस्मेत्यादि ॥ अंतरि

वृत्तं। अत्रयत्नादिग्व्याख्यानां पूर्ववत्स्वरवार्थः। वायुनावृतं वायोरंतरिक्षाधिपतित्वात्। तदाधिष्ठितं यत्तै
नवरणावरणाच्छीक्ष्णवज्रं वज्रनूवरणप इत्यस्यादोणादिस्त्वन्त्रस्त्वयः नेवचक्रेण निमित्तभूतेन। यस्मा
दित्यादिरस्त्वार्थः॥ ॥द्यौरसादित्येनवृतानयथ्यनयावत्यो यस्मादित्यादिद्यौः सादित्ये मवृता
अदित्यस्यतस्य आधिपतित्वात्। एवं लोकत्रयस्य सूर्याद्यधिष्ठानात्। वंसूर्यो नोदिवस्यानुरूपस्यर्थ
नस्तूयते। शिष्टं व्यक्तं॥ ॥दिशो वृताः अधिष्ठिताः दिशो चंद्रमसाधिष्ठितत्वं तत्प्रकाशत्वात्। अ
न्यघोख्यातं। प्रजावृतस्ताः प्राणेन वृतास्ताभिर्वृताभिः वत्री भिः यस्मादित्यादि। प्रजावृताः स
र्वत्र व्याप्ताः। तासां व्याप्तत्वं प्रात्येभिप्रायेण। प्राणोनलीवेन वृता असावृताः अधिष्ठिताः दिशो
चंद्रः अन्यत्सूर्ववत्। ॥अपावृतास्तावृत्तेरूणेन वृतास्ताभिर्वृत्रिभिः यस्मादित्यादि। ताआपोवृताः ॥२०॥
सर्वत्रव्याप्ताः ताः वरुणेन वृताः अधिष्ठिताः ता अस्याभिपतित्वात्। अन्यत्रेपूर्ववत्॥ ॥
वेदाः वृतास्तेछंदोभिर्वृतास्तेभिर्वृतेभिः वत्रिभिः यस्मादित्यादि। वेदावृताः सर्वत्र व्याप्ताः नि
नित्यत्वात्। तेछंदोभिः गायत्र्यादिभिः वृताः व्याप्ताः तभिः स्तोः तभिर्वृतेः तिष्ठसरसादृशाः।
वंदसिविकल्पितत्वात्। अन्यत्स्पष्टं सर्वं॥ ॥सर्वं वृतं नेदंदुखलेणवृतां तेनवृतेनवज्रेण
यस्मादित्यादि। सर्वं वृतमेवैतत्सर्वं जयवृतं सर्वत्र व्याप्तं। तेदुखलेण वृतं सरूपस्य सर्वस्य

ब्रह्मरूपत्वेनावस्थानात् ब्रह्मत्वं जातं तेन वर्तते नेत्यादि गतं ॥ इत्यान्यां स्थित्वा जपेत् ॥ स्वस्ति नो मिमीताश्वि
ष्ठसंहितानां सप्तर्चां आत्रेयाः स्वस्त्यात्रेयो ऽधि विश्वे देवास्तिस्रो जगत्यः त्रिष्टुभो वा द्यानुष्टुप्सौ त्रिष्टु सोऽव ॥ स्व
स्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ॥ स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथि
वी सुचेतुना ॥ नो अस्मभ्यं अश्विना अश्विनौ स्वस्ति । अविनाशं क्षेमं मिमीतां कुरुतां । भगः स्वस्ति क्षेमं
मिमीतां । तथा देव्यदितिश्च स्वस्ति मिमीतां । अनर्वणः प्रत्यवः पूषा अस्नुतः । शत्रूणां हिंसिता प्राणानां
बलानां दाता । स्वस्ति दधातु । नो अस्मभ्यं द्यावापृथिवी द्यावापृथिव्यावपि सुचेतुना शोभनेन धियेति शिष्टे स्व
स्ति मिमीतां ॥ ॥ स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ॥ बृहस्पतिं सर्वगणं स्वस्त
ये स्वस्तय आदित्यासो भवन्तु नः ॥ स्वस्तये क्षेमाय । वायुमुपब्रवामहे स्तुमह इत्यर्थः । सोमं चोपब्रवामहै
यश्च सोमो भुवनस्य यस्पतिः पालकः । सर्वलोकस्य जीवनः यस्य सोमायतनत्वात् । तथा सर्वगुणं सर्व
देवगणोपेतं बृहस्पतिं बृहतः कर्मणो मन्त्रस्य पालकापितः यं स्वस्तये स्तुमः ॥ आदित्यासः आदित्या
अदितेः पुत्राः सर्वे देवाः अरुणादयः द्वादशादित्या वा । नो अस्माकं स्वस्तये भवन्तु ॥ ॥ विश्वे देवा नो
अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ॥ देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥ विश्वे
सर्वेऽपि देवाः नो अस्मान् अद्यास्मिन् यागदिने स्वस्तये क्षेमाय अवन्तु वैश्वानरः स्वस्ति एनं नयंतीति

वैश्वानरः वसुः सर्वेस्य वासयिता अग्निर्देवाः प्रथमेवाग्निः ॥ वैश्वानर इति शाकपूणिरिति । यास्कः सोपि स्वस्तये वसु देवाक्ष भवोपि स्वस्तये । वंतु रुद्रो दुःखात् द्रावयिता देवोपि अंहसः पापात् स्वस्ति पातु नो अस्मान् ॥ ॥
स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ॥ स्वस्ति न इंद्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥ हे मित्रावरुणाभि
त्रावरुणो अहोरात्राभिमानी देवौ स्वस्ति कुरुतं । हे पथ्ये पथ्याः अंतरिक्षभागः तत्रहिताः पथ्या तन्मार्गाभि
मानिनी देवता तत् । हे रेवति । धनवति । रेवति स्वस्ति कृधि कुरु ॥ ॥ स्वस्ति पंथामनुचरेम सूर्याचंद्रमसा
विव ॥ पुनर्ददताघ्नता जानता संगमेमहि ॥ पंथाः पंथानं स्वस्ति क्षेमेणानुचरेम । सूर्याचंद्रमसाविव
तौ तथा निरालंबे मार्गे राक्षसादिभिः अनुपहतौ संचरंतः तद्वत् । किंच । प्रवसंतः पुनर्ददता अस्मिन् ॥२१॥
अघ्नता चिरकाल विलंबकोपेन दिव्याना जानता अविस्मरता यदीयः चिरं कोस्थं गतः कोयमिति संदेहम
कुर्वता मदीयोयमिति बुध्यमानेनेत्यर्थः उक्तलक्षणेन बंधुजनेन संगमेमहि संगच्छेमहि ॥ ॥ स्वस्त्य
यनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वायसं देवतानां ॥ असुरघ्नमिंद्रसखं समत्सु बृहद्यशो नावमिहारु
हेम ॥ तार्क्ष्यं नहपुत्रं गरुत्मंतं कीदृशं स्वस्त्ययनं हेमप्राप्ति हेतुं अरिष्टनेमिं रिष्टा हिंसा तद्विपरीता अ
रिष्टा तेषां नेमिं रक्षकं । यथा रथचक्रस्य नेमिः । तद्वत् । महद्भूतमात्रमाणत्वतः प्रभावतश्च महत् तं प्राणिवि
शेषं उभयत्र छांदसो लिंगव्यत्ययः महद्भूतं । स्नातक रतिवत् । वायसं गमनशीलं । देवतानां ।

मध्येपरिगणनार्थमितिशेषः। तद्रूपकाठ्गाललात्। तद्देवप्रतिपाद्यते। सूमनेसंग्रामेषुइंद्रस्यरथंतत्सहीयंअतरवा
सुरघ्नमसुरहंतारंबृहन्महद्दयशांकारणंएवंभूतंतेतार्क्ष्यमारुहेम। आश्रयंयाम। तत्रदृष्टांतः। अयथाना
वमारुह्य[illegible]ह्वाः निर्विघ्नंसमुद्रपारंगच्छंतीतितद्वत्॥ ॥अंहोमुचमांगिरसंगयंचस्वस्त्यात्रेयंनेमेसा
वतर्क्षं॥प्रयतपाणिःस्मरणंउपघेस्वस्तिसंबाधेष्वभयंनोअस्तु॥ नामानंत्रीणिआंगिरसंबृ
हस्पतिंगयमेतन्नामानंआत्रेयंश्रयंयाम। तद्रूपकात्कंसातद्परशःकारणंएवंभूतंतार्क्ष्यमारुहेम।
आस्वस्त्यात्रेयंतार्क्ष्यंगारुत्मंतंएतानृषीन्कर्मविघ्नार्थंबुध्यार्थंप्रयतपाणिः नयतपाणिःउपलक्ष
णमेतत्। सर्वेंद्रियनियमनस्यमनसावाचाशरीरेणउपघेउपत्स्येकेउपन्नोस्मिइत्यर्थः। संबोधेषुस्नाता
दिसंमर्देषुनोस्मभ्यंस्वस्तिविनाशोअयनंवास्तु॥ ॥यतइंद्रइत्यस्याःअगाथोभर्मइंद्रोयुज्जोबृह
त्यःअयुजःसतोबृहत्यः॥यतइंद्रभयामहेततोनोअभयंकृधि॥मघवञ्छग्धितवतन्नऊतिभिर्विद्विषो
विमृधोजहि॥ हेइंद्रयतःहिंसकात्भयामहेवयं। ततोनोअभयंकृधि। कुरु। हेमघवन्यादृशा
कोभवसिनोअस्मभ्यंअभयंकर्तुंतत्तर्हितवत्वदीयेऊतिरक्षणैःरक्षकैःपुरुषैर्वाकिंवा। विजहि
द्विषोअस्मद्वेष्टान्विजहि। मृधोअस्मद्धिंसकान्नाशय॥ ॥त्वंहिराधस्पतेइराधसोमहःक्षयस्या
सिविधतः॥तंत्वावयंमघवन्निंद्रगिर्वणःसुतावंतोहवामहे॥ हेराधस्पतेधनस्वामिन्॥ ६

त्वं हि विश्व खलु महो महतो राधसो धनस्य क्षयस्य वा गृहस्य वा वर्धयिता करणे समर्थो दियते । कस्य राध
सो गृहस्य वर्धको विधतः दूस्कृतो विधः परिचरतो यजमानस्य ॰ तं तादृशं त्वा त्वां वयं हे मघवन् इंद्र गिर्वो
णो गीर्भिः गिर्वणो गीर्भिर्वननीय सुतवं अभिषुतसोमा हवामहे । आह्वयामहे ॥ ॥ इंद्र स्पळ्ळुत वृत्रहा
परस्पा नो वरेण्यः ॥ स नो रक्षिषच्चरमं स मध्यमं स पश्चात्पातु नः पुरः ॥ अयमिंद्रस्य सर्वस्य स्ता
३२ तोत्तानकर्मा द्रिनाहा । वृत्रहा वृत्रं हंती परस्याः परपालयिता । नो अस्माकं वरेण्यो वरणीयः स इंद्रो
नो अस्माकं पुत्रमिति शेषः । रक्षिषत् । रक्षतु चरमं पुत्रं तथा स रक्षिषत् । अ मध्यमं पुत्रं रक्षिषत् । प
श्चाद्रक्षिषत् । नः पुरः पुरस्तात् रक्षिषत् । त्वं नः पश्चादिति । हे इंद्र त्वं नो अस्मान् पश्चात् पश्चाद्भागः ॥३२॥
पुरः पूर्वभागो अधरादधोभागः एतदुपरिभागस्योपलक्षणं ॥ एतद्दक्षिणभागस्याप्युपलक्ष
णं । किं च । बहुना । विश्वतः सर्वस्मात् नि पाहि हे इंद्र दैव्यं भयं अस्मदस्मत्तः आरे दूरे कृणु हे कुरु तेन
था अदेवीः । आयुधान्यारे कृणुहि ॥ ॥ अद्याद्या श्वःश्व इंद्र त्रास्व परे च नः ॥ विश्वा च नो जरितृन्स
त्पते अहा दिवा नक्तं च रक्षिषः । अद्याद्या सद्यो वाद्य महरस्ति । तत्र सर्वत्र एवं श्वःश्वः त्रायस्व रह
तु था च परे च परस्मिन् तृतीये हनि त्रायस्व । हे सत्पते सभापते कृ विश्वा च सर्वाण्यप्यहनि स
र्वेषयहः सु नो अस्माकं जरितृन् रक्षिषो हरसेतथा हार्दिवा नक्तं च रक्षिषः रक्षाभंगानि अ

यं मघवेंद्र ग्रभं गीत्र भंजन त्रीत्खः शूरः तुवी मघः तनुधनं सभिश्रः सम्यक्करि भ्राथि नातृणामित्यर्थः अर्थंवी
र्यकारणाय क्रमितिपादपूरणः। एवं महानुभावो भवति। अथ प्रात्यवादः। हे इंद्र ते उभावपि बाहू वृषाणां वर्षको मा
नानां हे शत्रकृतो बहुप्रज्ञ यया वज्रमायुधं निमिमिक्षितुः परिगृहीतौ॥ ॥अथ विवाहः॥ मधुपर्कादि गृह्याये
शांतं मंत्रार्थाः॥ उपोपवेशने। अहं वर्ष्म सुजातानां विद्युतामिव सूर्यः॥ इदं तमधितिष्ठामि यो माकश्चाभिदास
ति॥ सजातानां समानकाले जातानां विद्युतां विशेषेण द्योतते इति विद्युतः विद्युद्दादिते जसां वर्ष्म सूर्यश्च सूर्यो
यथा अहमिरवन सहास्थितानां तेषां तेजो रूपवर्ष्म अधिष्ठायपापहरतीति शेषः। तद्वद् अहं कश्च कोऽपि दीप
शत्रुः मां मां अभिदासति। दसु उपक्षये सर्वतः क्षयति तं इदं इदानी अधितिष्ठामि आक्रम्य स्थितोऽस्मि। अनेनाधि
ष्ठशाक्रमणेन शत्रुतेजो नश्यत्वित्यर्थः॥ ॥अमृतोपस्तरणमसि। हे अमृत त्वं आहुतिरूपस्य मधुपर्कस्य उप
स्तरणमास्तरणमसि भव॥ ॥मित्रस्य त्वा चक्षुषा प्रतीक्षे इति महानाम्निव्रते व्याख्यातं॥ देवस्य त्वेति मधु
पर्क धारणे मंत्रः उपनयने व्याख्यातः॥ द्वितीयवरं मधुपर्कावेक्षणे मधुवाता न ब्रस्य राहूगणो गौतमो वि
श्वे देवा गायत्री॥ मधुवाता ऋतायते मधु क्षरंति सिंधवः॥ माध्वीर्नः संत्वोषधीः॥ ऋतायते ऋतं यज्ञमात्म
न इच्छते। यजमानाय वाता वायवः मधु माधुर्योपेतं प्रयच्छंतीत्यर्थः॥ तथा सिंधवः स्यंदनशीलाः नद्यः स
मुद्रा वा मधु माधुर्योपेतं स्वकीयं रसं क्षरंति प्रयच्छंति। एवं नोऽस्मभ्यं ओषधीः ओषधी फलपाकांता ओषधयः
स्य माध्वी माधुर्योपेताः संतु भवंतु॥ ॥मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः॥ मधु द्यौरस्तु नः पिता॥

नक्तं रात्रि। नो अस्माकं मधु माधुमिति इति माधुर्योपेतः फलप्रदा भवतु। उत अपि च उषसः कालोपलक्षितान्य
हानि च मधुमंति भवंतु। पार्थिवं रजः पृथिव्याः संबंधिलोकः अस्माकं मधु मत्। माधुर्यविशिष्टफलदा भवंतु।
पिता यद्दिष्टप्रदानेन सर्वं पापालयिता द्यौः द्युलोकोपि मधुयुक्तो भवतु रजः शब्दो लोकवाची। लोकं रजांस्युच्यं
ते इति याः स्कू रजं त्यस्मिञ्जना इति॥ ॥ मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः। माध्वीर्गावो भवंतु नः।
नो अस्माकं वनस्पतिः वनानां पालयिता यूपाभिमानी देवः मधुमान् माधुर्योपेत फलवान् स्तु। नो ६ न्यं
फलं अस्मभ्यं प्रयच्छत्वित्यर्थः॥ सूर्यः सर्वस्य प्रेरकः सविता च मधुमान् स्तु। गावः अग्निहोत्रात्यैथाः ध ६
धेनवश्च नो अस्माकं मध्वा माधुर्योपेत पयसा युक्ता भवंतु नवा नो पतिः वनस्पतिः पारस्करादित्वात्सु
ट्। वनस्पतिः शब्दाद्युदात्तं॥ ॥ दिध्युस्व मधुपर्कं विकरणे। वसव स्त्वा गायत्रेण छंदसा भक्षयंतु ॥२२॥
ति॥ हे मधुपर्क असौ वसवो देवाः त्वां त्वां गायत्रेण छंदसा सह भक्षयंतु॥ रुद्रास्त्वा त्रैष्टुभेन छंदसा भ
क्षयंतु॥ एकादश रुद्रा देवास्त्वां त्वां त्रैष्टुभेन छंदसा सह भक्षयंतु॥ आदित्यास्त्वा जागतेन छंद
सा भक्षयंतु॥ द्वादशादित्याः वा देवा जागतेन छंदसा सह त्वां त्वां भक्षयंतु॥ विश्वे त्वा देवा आनु
ष्टुभेन छंदसा भक्षयंतु॥ विश्वेदेवाः आनुष्टुभेन छंदसा सह त्वां त्वां भक्षयंतु। दशां छंदोभिः स
ह साहचर्यं ब्राह्मणेभिहितः वसवस्त्वा गायत्रेण छंदसा दो भक्षते स्य स्त्वेति लोभक्षते स्पोद दामीत्यर्थः॥

मधुपर्कप्राशने। विराजो दोहोसि॥ अन्नं वै विराट् इह मधुपर्के विराजोन्नस्य दोहोसि क्षरयसि॥ सारोसीत्यर्थः। वि
राजो दोहमशीय॥ अतश्च तव परिग्रहाद् विराजोन्नस्य दोहः क्षरणमसि यत्प्राप्नुयां॥ मयि दोहः पद्यायै विराजः। वि
राजोन्नस्य दोहः क्षरणं मह्यां विन्द्यपाद्यापाद्यायै व प्राप्नुयो ग्यावै संततये भवतु इति विशेषः॥ यद्वा पद्यायै पद्यायाः ष
ष्ठ्यर्थे चतुर्थी। तं तव्या या विराजः दोहः मयि अस्तु॥ अमृतापिधानमसीति। हे अमृत अनंत अवदानस्
पस्य मधुपर्कस्यापिधानं दधन्नमसि। सत्यं यशः श्रीर्मयि श्रीः श्रयतामित्यपि सत्याद्वयः श्रयंतां तत्र बूयेन लक्ष्मीः
कांतिश्च। गोविसर्जने। माता रुद्राणामित्यस्याः भार्गवो गोस्त्रिष्टुप्॥ माता रुद्राणां दुहिता वसूनां स्वसादि
त्यानाममृतस्य नाभिः॥ प्रनु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट॥ या गौः रुद्राणां मरुतां मा
ता जननी वसूनां दुहिता पुत्री आदित्यानां स्वसा भगिनी अमृतस्य पयसो नाभिः आवासः स्थानं। वाम
नागामनागसं अदितिं अदीनां गां गोरूपां देवीं मा वधिष्ट। हे जनाः मा वधिष्टेति विचिकितुषे चेतनावते ज
नाय उ इदानीं प्रवोचं अहं प्रावोचमिति शुश्रूषमाणेभ्य उपदेशः॥ ॥कन्याप्रतिग्रहणे॥ क इदं कस्मा
दात्कामः कामायादात्कामो दाता कामः प्रतिगृहीता कामं समुद्रमाविश कामेन त्वा प्रतिगृह्णातु का
मैतत्ते वृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णातु॥ व्याहृतिः प्रकार विस्तारो यं। कः प्रजापतिः इदं द
क्षिणाद्रव्यं कस्मै प्रजापतये अदात् दत्त। ददाति। यजमाने। ऋत्विजि च प्रजापतित्वसंकल्पो व्याहृति विशे
षएषः। अपि च कामः कामाय ददात्यनुवर्तिने अथाधियजमाने ऋत्विजि च कामत्वं संकल्पः॥

व्यवच्छित्तिविशेषप्रकारः। काम एव ददातीति न यजमानः कामः अभिलाषः कामपूर्वकत्वाद्ददानः यः काम ए
व प्रतिगृहीता नाहं कामस्यैव निमित्तत्वात्। प्रतिगृहस्य कामं समुद्रमुपमेयं समुद्रवदपर्यन्तं कामम्मा
35 विशत्कामिनेव प्रतिगृहीतत्वात्॥ कामेन त्वा प्रतिगृह्णामि कामेन प्रयमाणो हं पराधीनात्। तदर्थं प्रति
गृह्णामि न मदर्थं प्रतिग्राह्य कामेन प्रतिगृहीताद्द्वारूपमायंन प्रतिगृह्णामहे काम एतत्ते एतद्दक्षि
णाद्रव्यं दैतेतवैव न मम। वृष्टिरस्ति तत्कारणत्वात्॥ सर्वस्य वस्तुनः द्यौस्त्वा ददातु वृष्टिद्वारेण यो स्त्वा
त्वां पृथिवी प्रतिगृह्णातु धारणद्वारेण। अयमपि व्यावृत्तिप्रकारः॥ ॥अग्न आयूंषि पवस इति
व्याख्यातास्ति स्त्वेः। त्वमर्यमा भवसी यत्स्याः आत्रेयो वसुस्कन्दीर्यमा स्निष्टुपू॥ त्वमर्यमा भवसि
यत्कनीनां नाम स्वधावन्गुह्यं बिभर्षि॥ अञ्जन्ति मित्रं सुधितं न गोभिर्यद्दम्पती समनसा कृ
णोषि॥ हे अग्ने त्वं अर्यमा भवसि। सर्वेषां नियमिता सर्वसि। यत्त्व यदा कनीनां कन्यकानां सं ।।२४।।
बंध्यस्मात्। तृतीयो अग्निष्टे पतिरिति श्रुतेः। किं वा हे स्वधावन् हविर्लक्षणान्न गुह्यं गोपनीयं ना
म बिभर्षि वैश्वानर इति तन्नाम सुधितं सुष्ठु निहितं। धितं नाम मित्रमिव त्वां गोभिः विकार
प्रतिशब्दः गोविकारैः क्षीरादिभिः अञ्जन्ति लेपन्ति प्रीणयन्तीत्यर्थः। यद्यस्माद्दम्पती समनसा समा
नमनस्कौ कृणोषि करोषि॥ ॥प्रजापतेन त्वदिति बौले व्याख्यातं॥ पाणिगृहणं॥ गृभ्णामि

तेसौभगमित्वामित्यस्याः सावित्रीसूर्यासूर्यात्रिष्टुप्॥ गृभ्णामितेसौभगत्वायहस्तंमयापत्या
जरदष्टिर्यथासः॥ भगोअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः॥ हेवधुस्तेहस्तं
3 गृभ्णामिकिमर्थंसौभगत्वायसौभाग्यायमयापत्यात्वांयथाजरदष्टिः आप्नुवाधवया। असौभ
वति। भगोअर्यमासवितापुरंधिः पूषावैतेदेवाः त्वांत्वांमह्यमदुर्दत्तवंतः किमर्थंगार्हप
त्याययथाहंगृहपतिस्यामितिकिमिव॥ लाजाहोमे॥ अर्यमणंनुदेवंकन्याग्निमयक्षत॥
सइमांदेवोअर्यमाप्रेतोमुंचातुनामुतः स्वाहा॥ हेअर्यमणंऋगतोअर्यमइत्यर्यमाग्निः
तंप्रसिद्धंदेवंघोतमानंअर्यमणमग्निंनुक्षिप्रंकन्याः पूर्वाः अयक्षतइष्टवत्यः। इष्टावपति
मलभंतः सइदानीमपियलाजाहोमेनेष्टः सोर्यमादेवोअग्निः इमंकन्यांइतः पितृकुलात्प्रमुं
चतुमुंचतुदीर्घः छांदसः मावपातित्यर्थः॥ नामुतः अमुतोभर्तृकुलान्नमोचयतु॥
वरुणंनुदेवंकन्याग्निमयक्षत॥ सइमांदेवोवरुणः प्रेतोमुंचातुनामुतः स्वाहा॥ वरुणंवरू
वरणेनमस्योवारकंदेवंअग्निशिष्टव्याख्यातं॥ ॥पूषणंनुदेवंकन्याग्निमयक्षत॥ सइमां
देवः पूषाप्रेतोमुंचातुनामुतः स्वाहा॥ पूषणंपूषपुष्टौरश्मिभिः पुष्यतइतिपूषादेवोग्निः

तं कन्यादस्यादिपूर्ववद्। लाजाहुती नामधेयमध्येग्निप्रमणे। अमोहमस्मि सा त्वं सा त्वमस्य
मोहं द्यौरहं पृथिवी त्वं सामाहमृक् त्वं तावेहि विवहावहै प्रजां प्रजनयावहै संप्रियौ रोचिष्णू सुम
नस्यमानौ जीवेव शरदः शतमिति। अथैहं अमो घलोकोस्मि सा त्वं साप्सरस्मि सा त्वम
35 स्य व्याख्यातं॥ सामाहं अहं साम ऋग्रूपोस्मि ऋक्त्वं त्वं ऋग्रूपासि। तौ तादृशावावां इहास्मि
न्लोके आविवहावहै आसमंतात्संगावहे प्रजां संततिं प्रजनयावहै उत्पादयावः। की
दृशौ संप्रियौ इदमिदं कर्त्तव्यमिति परस्परं संप्रियमाणौ रोचिष्णू सदृशा संबंधत्वात्परस्पर
स्पराश्रयणात् दीप्यमानौ सुमनस्यमानौ सुमनायमानौ दृशा— सलोपाभावः छांदसः।
सदृशावावां शतं शरदो जीवेव॥ ॥ इमममश्मानमारोहाश्मेव त्वं स्थिरा भव॥ सहस्व
पृतनायतो ऽभितिष्ठ पृतन्यतदृति॥ हे वधू त्वं इममश्मानं दृषदमारोह। अश्मेव त्वं स्थि ॥२५॥
राभव। पृतनायतः पृतनाकामान्सहस्व। अभिभव। अपि सर्वे पृतन्यतः पृतनाका
माः। तान् वा भितु तिष्ठ अभिभव॥ पादितिस्वेव ध्रुवेत्रोलाद्युं वामीत्यस्यासावित्री सूर्या
ऋषिः पाद्यो ऽग्निस्त्रिष्टुबनुष्टुभौ॥ गत्वा मंडु वामिवामिवरुणस्य पाशाघेनत्वाबध्ना सवि

तास्त्राव: ॥ स्रुतस्य योनौ सुतस्य लोके रिष्टां त्वा सह पत्न्या ददामि ॥ जातं प्राणिनं सपित्वा प्रहितो वरू
ण आत्मपाशो बध्नाति तस्माद्वरुणस्य पाशात् हे वधु त्वां त्वां प्रमुंचामि पत्न्या हो नत्वा त्वां सवि
ता वरुणप्रेरकः सुशेवः सुसुखः अबध्नात् बंधनकृतवान् । यत्नाविनियोगपक्षे पत्नीयोक्त्रेण
बध्नाति । बंधस्य वरुणाभिमानी अतो वरुणस्य पाशात् कामन् प्रमुंचामि येन यो वरुणः सविता
कर्मणामनुज्ञाता देवः ऋत्विग्याजेनाबध्नात् मोचयित्वा हा ऋतस्य यज्ञस्य योनौ यगर्भो नभूमौ सुकृत स्था ५
स्य लोके कर्मक्षेत्रे भूलोके वा । अरिष्टामहिंसितां त्वां त्वां पुत्राद्यर्थं पत्न्या सह ददामी स्थापयामि ॥ ॥
प्रेतो मुंचामि नामुतः सुबद्धाममुतस्करं ॥ यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगां करणु ॥ इतः पि
तृकुलात् प्रमुंचामि त्वां ॥ नामुतः भर्तृगृहान्नामुंचामि । अमुतो भर्तृगृहे सुबद्धां करं यथे
यं कन्या हे इन्द्र मीढ्वः सेक्तः सुपुत्रा सुभगा सुष्टुभावा या वा स्यादिति तथा कुरु ॥ ॥ सप्तपदस्य
नेक्रमणे । इष एकपादी भव सा मामनुव्रता भव । पुत्रान्विंदावहै बहूंस्ते संतु जरदष्टय
इति । इषे अन्नाय भव । अन्नं यथा स्यात् । एकपदी भव एकं पदं पादविक्षेपस्थाने यस्याः
सा एकपदी पादोन्यसरस्यामीति । टीप्र । एवं द्विपाद्यादिषु द्रष्टव्यं भव्यवां भसम ध्यर्थं

मेकंपदविक्षेपंकुर्वित्यर्थः। सासा ना दृशी त्वं मामनुव्रता भव मां प्रत्यनुव्रता अनुगुणव्रता भव॥
मया यद्व्रतं क्रियते तदेव व्रतं तस्याः॥ अथवा मामनुव्रता मम नस्फूर्तिः व्रतं यस्याः असि प
तिव्रता भवेत्यर्थः। इह इत्यावावां बहून्पुत्रान्विंदावहै॥ ते पुत्राः जरदष्टयः अष्टिः अश्नु व्याप्तौ
36 इत्यस्मात्क्तिन अष्टिः रायुषो व्याप्तिः जरां भाजरायुक्ताष्टिः येषां ते जरदष्टयः॥ ॥ऊर्जे
द्विपदी भव। ऊर्क् बलं तद्बलं यथास्यात् द्विपदी द्वे पदे पादविक्षेपस्थाने यस्याः सा द्वि
पदी भवादि व्याख्यातः॥ ॥रायस्पोषेत्यादि रायो धनस्य पोषाय पुष्ट्यै तद्वरा यस्या
यथास्यात् त्रिपदी त्रीणि पदानि विक्षेपस्थानानि यस्याः सा त्रिपदी शिष्टं स्पष्टं॥ ॥मायो
भव्याय इत्यादि। मयः सुखं तद्भावयतीति मायोभूः तस्याः भावो मायोभव्यं यथास्यात् च॰ चतु ॥२६॥
ष्पदी चत्वारि पदविक्षेपस्थानानि यस्याः सा चतुष्पदी भवादि व्याख्यातः॥ ॥प्रजाभ्यः
पंचपदीत्यादि। तत्र प्रजाय यास्याः पंचपदी पंचपादविक्षेपस्थानानि यस्याः सा पंचपदी॥ ॥
ऋतुभ्यः इत्यादि ऋतवः षट् संख्याकाः तेभ्यः तदुते यथा असकृदावर्तते। अनेन ऽआयुर्वृद्धिरु
पलक्षिता॥ ॥सखा सप्तपदीत्यादि। सप्तपदानि यथा आक्रांतानि स्म स सप्तपद एवंभूता

त्वंसखासखीभवममेत्यर्थः ॥ ॥ वाग्विसर्गः । जीवपत्नीप्रजांविंदेयेति । वः पतिः यस्याः साजीवपत्नी
अहंप्रजांविंदेयं लभेयं ॥ ॥ दंपत्योः प्रयाणे । पूषात्वेतोनयत्वित्यस्याः सावित्रीसूर्याऋषिपाद्यार्थः ।
त्रिष्टुप् ॥ पूषात्वेतोनयतु हस्तगृह्याश्विनात्वाप्रवहतां रथेन ॥ गृहान्गच्छगृहपत्नीयथासोवशिनी
त्वंविदथमावदासि ॥ हस्तगृह्य हस्तंगृहीत्वा पूषात्वा इतो नयतु । प्रापयतु । अश्विनात्वा वा रथेन
प्रवहतां प्रगमतां । गृहान् भर्तृसंबंधिनो गच्छत्वं । यथा गृहपत्नी यथासः भवसि गृहस्वामिनी भवसि
वशिनी सर्वेषां गृहाणां वशे प्रापयित्री पत्युरभि वोवत्रे मानाधिवि दथं पतिगृहं आवदासि गृहस्थितं
स्यादि जनेन भावेदानावारोपणे क्रामतो । अश्मन्वतीरीयतेति । यस्याः पत्युः देवानां परस्परसंवा
दात् एव ऋषयो देवता त्रिष्टुप् । अनायादेवाय सतांजिगामिषवः परस्परं ब्रुवते । अश्मन्वती नामनदी नी
यते गच्छति रिगतिरेषणयोः तां यज्ञगमनायोत्तरीत उत्तिष्ठत प्लवत । यथा कृत्वा प्रतरतां नदीमुल्लं
घ्य नयत हे सखायो यजमानस्य सततमिति । देवानां संबंधनं । अत्र यस्यां न घोगहामपरित्यजा
मकानीति उच्यते । ये अशेवाः शेवमिति सुखनाम । ये असुखभूताः ॥ अत्राने स्थासन् अश्मा
नाभ्रिस्यवंति तेतान् जहीम ॥ तथा वृत्तानि शिवान् सुखकरान् ॥ वाजान् अन्नानि । अविष्या प्राप्नुमु

त्तरेम॥ वधांसदंत्यां। जीवंरुदंतीत्यस्यौषाश्विनौजगती॥ जीवंरुदंतीति रुदत्यांविवाहाग्निमग्रेनो
नरुत्रनयंतिकल्याणेषुदेशावक्षसवनुष्यथेषु॥ ॥हेअश्विनौयुवयोअनुग्रहान्पेनरःपतयोजा
यानांरोदनमवआसन्नमित्यर्थः। जीवंतिजीवनमुद्दिश्यानिरुदंतिरोदनेनाभिजायानांरोदन
५६ मवआसन्नमित्यर्थः। तावकेअध्वरेयज्ञेविमयंतेनिवेशायंतेनिवेशायंतिवा। किंच। तासुदीर्घाम
हतींप्रसितिंतुजयःप्रवधनमनुदीधियुःअनुदधाति। इदंवामंवननीयंअपत्यंपितृभ्यःसंप
रितेसमेरस्वतेभ्यःपितृभ्यःजनयोजायापरिषक्तेपरिष्वांगार्थीमयःसुखंकुर्वंतीतिशेषः॥
कल्याणेषुदेशावक्षसवनुष्यथेषुजपः॥ माविदन्परिपंथिनइत्यस्यासावित्रीसूर्यासूर्यानुष्टुप्॥
माविदन्पारिपंथिनोयआसीदंतिदंपती॥ सुगेभिर्दुर्गमतीतामापद्रांत्वरातयः॥ परिपंथिनःप्र ॥२७॥
र्यवस्थानारयःशत्रवोमाविदन्माप्रापयन्येपरिपंथिनःतेसासीदंतिअभिगछंति। सुगे
भिःसुगेःमार्गैर्दु र्गंदुःखेनगंतंशक्यंदुर्गमंदेशमतीतांअभिगछंतांअरातयःअदाता
रःभवंत्वित्यर्थः॥ ॥सुमंगलीत्यस्याःसावित्रीसूर्यासूर्यानुष्टुप्॥ सुमंगलीरियंवधूरि
मांसमेतपश्यत॥ सौभाग्यमस्यैदत्वायाथास्तंविपरेतन॥ इयंवधूःसुमंगलीःशोभन

मंगल्या। अतः मंगल्यं कर्त्री रः समन्तेसंगच्छतां। पश्यत वन्तां संगताश्च दृष्ट्वा स्याउढाये सौभग्यं दत्वायदत्वा
अथास्तंगृहंनामैतन्।। स्वं वेश्मगृहं प्रति विविधं परेतन परागच्छतु।। ।।वध्वा गृहप्रवेशने।। इहप्रिया-
मित्यस्याः सावित्री सूर्या सूर्याप्रतिपद्यार्थो जगती।। इहप्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हप-
८३ त्याय जागृहि।। एना पत्या तन्वा संसृजस्वाधाजिव्री विदथमा वदाथः।। हे वधू ते तव इहास्मिन्र
पतिकुले प्रियं प्रति प्रजाया सह समृध्यतां।। अस्मिन्गृहे गार्हपत्याय गृहपतित्वाय जागृहि बुध्य-
स्व।। अथाजिव्री जीर्णौ जायापती युवां विदथं गृहं मावदाथः। अभिमुख्येन वदथ।। ।।गृहप्र-
वेशनीयाज्यहोमे प्रजामित्यादि पंचर्चा सावित्री सूर्या सूर्याद्या जगती द्वितीया त्रिष्टुप्। तिस्रो-
नुष्टुभः।। आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा।। अदुर्मंगलीः पतिलोकमा
विश शं नो भव द्विपदे शं चतुष्पदे।। प्रजापतिः अस्माकं प्रजामजनयतु अर्यमा आजरसा-
य जरापर्यंतं जीवनाय समनक्तु। संगमयतु। सा त्वं अदुर्मंगली दुर्मंगलरहिता सुमंगली
पापामंगल्याचाराद्दूषयति सा दुर्मंगली। ततोन्या अदुर्मंगली। तादृशी भव लोकस-
मीपमाविश।। शान्नुहि। नो द्विपदे शं चतुष्पदे।। ।।अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः
सुमनाः सुवर्चाः।। वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे।। हे वधू अघोरचक्षुः

मं भा पं १३८॥

अघोरा दभयंकरचक्षुः एधितथायथापशुभ्यः शिवाहितकारिणी भवसुवर्चाभव वीरसूः देवपुत्राणां भवप्रसवि
त्री। देवकामा स्योना सुखकरी भव॥ ॥इमां त्वमिंद्र मीढ्वः सुपुत्रां सुभगां कृणु। दशास्यां पुत्राना धेहि पतिमेका
दशं कृधि॥ हे मीढ्वः अभिमनवर्षक इंद्र त्वं इमां यां वधूं सुपुत्रां सुभगां कृणु। कृधि॥ अस्यां वध्वां दश पुत्राना धेहि पति
एकादशं कृधि। दश पुत्रा पितरेकादशाका यथा स्यात्तथा कृधि कृणु॥ ॥सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव॥
ननांदरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु॥ हे वधू श्वशुरादीषु त्वं सम्राज्ञी भव इतरेषु इत्यर्थः। पत्युः स्वसा न
नांदा श्वश्रूः श्वशुरपत्नी श्वशुरादिषु शुश्रूषादीनां तेषु तव बहुमानेन सम्राज्ञी विशिष्टं स्पष्टं॥ ॥हृदयांजने दधिप्रा
शनेवा॥ समंजंतु विश्वे देवाः समापो हृदयानि नौ॥ संमातरिश्वा संधाता समु देष्ट्री दधातु नौ॥ विश्वे देवाः स
र्वे देवाः नौ हृदयानि मानसानि समंजंतु॥ सम्यग् अंजंतु। दुःखादिक्लेशादि कृत्वा लौकिक वैदिक विषयेषु ॥३८॥
प्रकाशानि कुर्वंत्वित्यर्थः। आपाश्च समंजंतु। तथा मातरिश्वा नौ संदधातु आवयो बुद्धीः परस्परानुकू
लाः करोत्वित्यर्थः। देष्ट्री दात्री फलानां सरस्वतीत्यर्थः॥ सा च संदधातु॥ इति गर्भाधानादि मंत्र
भाष्यं समाप्तं॥ ॥छ॥ ॥छ॥ पुरुषोत्तमस्येदं पुस्तकं॥ छ॥ शाके १६५७ विरोधकृन्ना
म संवत्सरे। कार्त्तिक कृष्ण चतुर्थ्यां गुरुवासरे तद्दिने लिखितमिदं पुस्तकं मंत्रभाष्यं स
माप्तं॥ छ॥ श्रीविश्वेश्वरार्पणमस्तु॥ छ॥ स्वकीयं॥ छ॥ शुभमस्तु॥ छ॥ श्रीरस्तु॥ छ॥